1936

च अभिधाये च वा मध्ये यंत्रे नामेत्यमरः एवंविधं वंगं वा नागं वा हेमं हेमपत्रं वा तारं तारपत्रं । एतत्सर्वं बलिना कृतं जायेत मृतं
च सर्वं गर्भे रसांतर्द्रवति नात्र संदेहः ॥ असंदिग्धमित्यर्थमुक्तं च शब्दाज्जरति निःशेषत्वमाप्नोति माक्षिकं शुद्धवर्णं दरदसहितेन
यंत्रे पूर्वोक्तानयोः पात्रे सहितं रुद्धापितं तेन पुनरनेन पक्वौषधेन तार्क्ष्यपत्रं वा । तारं रूप्यपत्रं कनकं तारणयंत्रे पक्वं कुर्यात् एतत्
पंचगर्भे रसादेरपतति प्राप्नोति द्रवति मिलति शेषः ॥ च शब्दग्रहणाज्जरति च ॥९४॥ प्रयोगांतरमाह ॥ रसकं बलिना युक्तं पूर्वो
क्तं विधानयोगेन पक्वं चूर्णं यावद्द्रवति भृशं द्रवति गर्भे च ॥९५॥ टी० ॥ रसकं वा पारदं बलिना गंधेन सह युक्तं सत् समभागे
नेति शेषः कृत्वा पूर्वोक्तविधानयोगेन पूर्वोक्तं यद्विधानं यंत्रादिकं तस्य योगो यो योगस्तेन कृत्वा पक्वं कुर्यात् तावद्भ्रामयेत्यर्थे
पक्वं कार्यं यावत् अन्नाशितां याति न चूर्णं गर्भे रसादेरद्रवति गर्भे द्रुतिर्भवति च शब्दाद्द्रवति च ॥९५॥ ॥ ॥

॥९६॥ टी० ॥ शुद्धमाक्षिकचूर्णं निर्व्यूढं यच्छतगुणं हेम्नि हे
म्नि रूक्ष्णं शतगुणं हेम्नः शतशतगणितसमनिर्व्यूढहेमतुल्यांशं च समभागं सूततुल्यं गर्भे रसादेरद्रवति जरति अत्र विधानेन
समभागे जरति तारसो मो नीति भावः यथा च अष्टगुणं यद्भ्रकबीजं षड्गुणास्तत्र विलीनः हेमसमे मसमं रसबंधतरं मनविस्म
यः कार्यः ॥९७॥ टी० अथेत्यनंतरं गंधकारमागंधपाषतः ॥ शतगुणसंख्यं यथा तथा उन्नमे हेम्नि पूर्णे वर्णे व्यूढो निर्वाहः तद्ध
ध्यूढं ॥ अथ वा शतनिर्व्यूढं ॥ शतगुणमथ मूषायां प्रकाशमूषायां वह्नियोगश्चेति शेषः तालकसत्वस्य हेम्नि निर्वाहः का
र्यः इति व्यक्तिः ॥ तच्च तत्सत्वं केवलं वा शिलया मनः शिलया सहैव निर्व्यूढं कार्यं तद्धेमगर्भे रसादेरद्रवति अथ रसेंद्रो रसराजो द्रुतं
जरति विधानेनेति ॥९९॥ अथ विधांतरमाह ॥ रसदरदाभ्रकताप्यविमलामृतशुल्वलोहपाषाणकास्नुद्यर्कदुग्धपिष्टं कुष्ठ
शिलायुतं नाग ॥१००॥ रसदरदाभ्रकताप्यमिति रसः पारदः दरदं हिंगुलं अभ्रकं प्रतीतं ताप्यं स्वर्णं माक्षिकं एकवद्भावाद्द्वंद्वः पु
नः विमलारुक्ममाक्षिकं मृतं यत्सूचताम्रं चलोहो मुंडादि एतेषां दरदादीनां रसपर्पटीवत् पर्पटीकृत्या कार्यं तया युतं नाग
पुनः कुष्ठं शिलायुतं कुष्ठं हरितालवर्णा विषहरपाषाणजातिः शिलामनो द्वाभ्यां युतं मिश्रितं यन्नागं कंकुष्ठ पुटविधाने
नेति शेषः ॥ एतदपि बीजं सिद्धगर्भे द्रवति पूर्वसंबंधात् ॥१०१॥ अथ वंगबीजविधानमाह ॥ अभ्रकतालकशंखरससहितं यः पुनः पुटित

चिंचाक्षारैः विमिश्रं वंगं निर्जीवतां याति ॥२९॥ यद्वाक्षारविमिश्रं यद्वंगं अम्लिकाक्षारयुक्तं रंगं अभ्रकतालकं शंखवरसहितं अभ्र
कं प्रतीतं तालं हरितालं शंखं कंबुः वरं रसः पारदः एतैश्चतुर्भिः सहितं यथा तथा पुनः वारं निरुध्यं यावत्तावत् पुटितं कुर्यात् एतद्दो
षधस्यांशविभागेन सप्तपुटं वाद्वंगं निर्जीवतां याति पंचत्वमाप्नोति एतदपि बीजं सद्गर्भद्रावणे तारणार्थसंबंधात् ॥२९॥ नागवंग
योरेतद्दोषधकारणमित्याह ॥ विधिनानेन च पुटितं म्रियते नागं निरुद्धतां चगतं वंगं च सर्वकर्मसु नियुज्यते तदपि गतजीवं ॥२२॥ अने
नैव विधिना उक्तविधानेन नागं सीसकं पुटितं सत् म्रियते मृतो भवतीति वा अमुना विधिना तेनैव निरुद्धतां गतं अशरीरतां प्राप्तं वंगं
सर्वकर्मसु चारणे जारणे भक्षणादिकार्येषु युज्यते रसज्ञैरिति शेषः नागवंगमारणमेकविधमेव अमृतो भक्षणादिषु परस्परं गुणा
धिक्यो न तु जारणादिषु ॥२२॥ नागवंगशुल्बतीक्ष्णानां जारणविधानमाह ॥ मृतनागं मृतवंगं मृतवरशुल्बं मृततथा तीक्ष्णं ए
कैकं हेमक्षितिनातनिर्व्यूढं द्रवति गर्भे च ॥२३॥ मृतनागमिति मृतं निर्जीवतां गतं यन्नागं तथा सीसकं तथा नेन विधानेन मृतं वंगं वर
निरूप्यतां गतं शुल्बं ताम्रं तथा च मृततीक्ष्णं अरिवर्गणीति शेषः एषां मध्ये एकैकं नागं वंगं वा शुल्बं वा तीक्ष्णसारं पृथक् क्षेत्रे हेम
वर्णं रूपवर्णं स्वर्णं नातनिर्व्यूढं हेम्नः नातगुणनिर्वाहितं कुर्यात् । तस्मिंस्तु गर्भे रसो द्रवति च नाद्यातं जरति च तारं नातगुणवंगं
निर्व्यूढं तारबीजं ॥२३५॥ अथ महाबीजप्रभावं दर्शयन्नाह ॥ महाबीजप्रभावं दर्शयन्नाह ॥ समगर्भद्रुतिकारणं हेम्नो वक्ष्याम्य
हं परं योगं ॥ आमलकस्य कचूर्णशतनिर्व्यूढं महाबीजं ॥२४॥ टीका ॥ इहास्मिन् शास्त्रे विधिनामहतशास्त्रोक्तानि यानि बीजानि उक्तानि
तानि कर्तव्यानि सामान्येनेति भावः परं गर्भद्रुत्यर्थं अयं वार्तिकोऽयं योगः वार्तिकाशास्त्रोपदेशरहिता इत्यर्थः ॥
अत्र भावाद्यर्थे इकप्रत्ययः ॥ तेषु वार्तिकेषु इदं प्रवरो योगः तथानेन प्रकारेण एकमतश्चायं शास्त्रोपदेशिनां शास्त्रोपदेशरहितानां
अभिमत इत्यर्थः ॥ २४॥ रसोदरबीजद्रावणविधानं अथ वा गंधकधूमं तालकधूमं शिलाक्षारसकस्य ॥ दत्वा धरमुखमुषां दीर्घतमालव
र्परस्याई ॥२५॥ ऊर्ध्वलग्नापिष्टीं मृदं च यथा तथा च कर्तव्या ॥ दत्वा सर्परपृष्ठे दत्यं इंद्रालिना मानं प्रस्तावनात् गंधकं तदनु तत्करणं
धापयेत् मृदामृदालिप्तां भंगो द्रवति हि बीजं म्रियते तथाधिकदाहः ॥२८॥ अथ तिसमुद्रयं ऊर्ध्वदीर्घतमा मूषायास्तलभागं
पिष्टीरसं बीजयोः मिता पिष्टिका चपुनः मृदा अभिलाय मूषायास्तथा तलं नाकर्तव्या किंतु चारवर्परस्याधं मृन्मयपात्रस्य खंडस्याई १६

खंडं देशाद्यर्थः ॥ दीर्घतमामित्यर्थः ॥ दीर्घा अधोमुखमुषां अधोभागे मुखं यस्याः सा तथोक्तां दत्वा पुनः किं कृत्वा गंधकं मंदं दत्वा
वारं लोकं स्तोकं अल्पमल्पं तालकधूमं दत्वा वा शिलाक्षारसकस्य शिलावामनः शिलारसकं चरवर्परं नाम अधोमुखमूषामुखं वा मृदा
लिप्तमेहीकृत्य चकरीषाधूपयेत् करीषवह्निरित्यर्थः एवं मूषां चरवर्परं च दत्वा दत्वेत्यं इंद्रालिना मानं प्रस्तावनात् गंधकं तदनु तत्करणं
पश्चाद्दाहयेत् एवं कृते रसे इंद्रे मिलितं यद्बीजं तद्गर्भे रसे द्रांतर्भवति पुनर्बीजसहितारसे द्रो अधिकदाहे सति म्रियत इत्यर्थः ॥ श्लो
कत्रयसंबंधात् कुलकं ॥२८॥ अथ सुवर्णजारणार्थं विडमाह ॥ गंधतालकशैलाः सौवीरकरसकगैरिकं दरदं ॥ क्षाराम्ललवणानि
विडो माक्षिकवैक्रांतं विमलसमभागैः ॥२९॥ टी० गंधकतालकशैलाः शीतगंधकं प्रतीतं तालकं हरितालं शैलः शिलाजतु ः द्वंद्वः स
मासः तथोक्ताः तेन तथोक्ताः समभागाः कार्याः पुनः सौवीरकं शुक्तांजनं रसकं चरवर्परिकं धातुगैरिकं दरदं हिंगुलं ॥ अत्र एकवद्भावः
समासः तत्तथोक्तं समभागं कार्यं पुनः क्षाराम्ललवणानि क्षाराः यवक्षारादयः अम्लो जंबीरादिः लवणानि सैंधवादीनि एतान्य
पि समभागानि कैः सह माक्षिकवैक्रांतविमलसमभागैः सह माक्षिकं स्वर्णमाक्षिकं वैक्रांतं वज्रभूमिजं रजः विमलं रूक्ममाक्षिकं
एतानि समभागानि तैः विडः उच्यते स च समभागैः समर्दितैः विडः कार्य इत्यर्थः ॥२९॥ विडयोगाद्यथा बीजं गर्भे द्रवति तथाह ॥ कृ
त्वा सुवर्णपुष्टीं मृदितां च सुवेष्टितामनेनैव ॥ तन्त्रिपुटैस्तप्तैरवल्वैर्मृदितागर्भे तथा द्रवति ॥३०॥ टी० पूर्वोक्ता या पिष्टी अनेनैव
क्तविडयोगेन तप्तैरवल्वैः तप्तसंबंधाल्लोहमयैः तन्त्रिपुटैः करीषाग्न्यात्मकैर्मृदिता घर्षिता सती अनेनैव वेष्टिता कार्या किं कृत्वा सुवर्ण
पिष्टीं कनकपिष्टीं वा अन्यस्यापि धातोः सुवर्णपिष्टीं शोभनवर्णां पिष्टीं कृत्वा अवल्वैर्मृदितासतीति तथा तेनैव प्रकारेण न त्वन्यप्रका
रेण गर्भे रसो द्रवति सलिलरूपा पतिष्ठति ॥३०॥ अथ वैक्रांतगर्भद्रुतिमाह ॥ रक्तं शतनिर्व्यूढं नेत्रहितं भस्म वैक्रांतकं चाथ विमलं
शतनिर्व्यूढं यस्मिन् समं द्रवति गर्भे च ॥३१॥ टी० ॥ वैक्रांतभस्म वैक्रांतभूमिजं रजः तदुद्भवभस्मरक्तकगणेशतनिर्व्यूढं यस्मिन् स
मं शतवारं निर्वाहितं कुर्यात् कुर्यात् किं विशिष्टं नेत्रहितं शब्देन भणितं वदर्शितं भणयो नेत्रहिता इव विमलं तूष्णं आक्षिकं श्वेतव
र्णं यन्माक्षिकं रक्तगणेशतनिर्व्यूढं कुर्यात् ॥ तदुभयं वैक्रांतं विषयत्वं चरक्तशतनिर्व्यूढं सतरसो ग्रासविधानं विहाय ॥ समयूनं यस

तिकथलयति पुनस्तद्भसितं गर्भरसं तद्दृढति जरति च शब्दार्थः ॥३१॥ रक्तगणाधिक्यं दर्शयन्नाह ॥ येकेचिद्विडयोगाः क्षा
राम्लवणानि मिदीप्तवर्गाश्च ॥ सर्वे ज्ञातनिर्व्यूढाः गर्भद्रुतिकारकाः ॥ कथिताः ॥३२॥ टीका ॥ येकेचिद्विडयोगाः अत्र
च ग्रंथांतरेषु कथिताः तथा क्षाराम्लवणानि कथितानि ॥ क्षाराः यवक्षारादयः अथ च वृक्षौषधिसमुद्भवाः आ
म्लाजंबीरादयः आम्लवृक्षशाकसमुद्भवानि च यानि तानि कथितानि च पुनः येदीप्तवर्गाः कथितादीप्तिकरा योगाः
अभिहितास्ते सर्वे विडक्षाराम्लवणादीप्तवर्गाः ज्ञातनिर्व्यूढाः समग्रगर्भद्रुतिकारकाः गर्भरसादेर्द्रुतद्रवरूपं कुर्वंतीति धा
तुमणिरत्नादीनितिशेषः ॥३२॥ अतनिर्वाहितादौ समादिविभागमाह ॥ ज्ञातनिर्व्यूढे च समं पादोनपंचसप्तनिर्व्यूढे पंचाश
तुनदर्घपादस्यात्पंचविंशतिके ॥३३॥ ज्ञातनिर्व्यूढ इति चकवारं निर्वाहितो रक्तगणो इति शेषः समतुल्यं ग्रसति रस इति पुनः पं
चसप्तनिर्व्यूढे सति न्यूनाधिकांशा ज्ञेयः ॥ इति विशेषार्थः ॥३३॥ अस्मनिर्व्यूढक्रममाह ॥ अष्टांशं तु तदर्द्धे षोडशांशाद्भागं तद
र्द्धे निर्व्यूढ ॥ तस्यार्द्धे द्वात्रिंशत् चतुःषष्ट्यं तदर्थं निर्व्यूढ ॥३४॥ टी० ॥ तु पुनः तदर्थं साई द्वादशके निर्व्यूढे सति षोडशांशमिति
पुनः तस्यार्धे त्रिवारं निर्व्यूढे सति षोडशांशमिति पुनस्तस्यार्धे त्रिवारं निर्व्यूढे सति द्वात्रिंशदंशं तदर्धे निर्व्यूढे सति चतुःषष्ट्यां
शं सम्यग्निर्व्यूढादिसमग्रासो रारकामित्यर्थः ॥३४॥ गर्भद्रुतेस्तस्याः कर्तव्यमाह ॥ इति गदितं गर्भद्रुतिमभिषवयोगेन चाम्लवर्गेण
स्वेदनविधिना ज्ञात्वा मर्दितं तप्ते तुरवतले ॥३५॥ इत्यनेन विधानेन गदितं कथितं गर्भद्रुतिं ज्ञात्वा तप्ते खल्वतप्ते संमर्दयेत् लोहमय
कराग्निना बुध्वा तां नीत्वा तप्ते मर्दितां कुर्यात् तत्र अभिषवयोगेन अभिषवः संमर्दनं तस्य योगेन वनकवलं अनेन अम्लवर्गेण
च जंबीरादिना न केवलमनेनापि स्वेदनविधिना च स्वेदनविधिः स्वेदनसंस्कारा ज्ञात्वाभिहितः जारणहेतोरितिशेषः ॥३५॥ मर्दनस्व
दनयोः पूर्वापकरणं दर्शयन्नाह ॥ ज्ञात्वा बीजबलाबलं मर्दनयोगं कृतं च रसराजे ॥ स्वेदविधानं च पुटं यंत्रं वा विहितरसकर्म ॥३६
टी० ॥ बीजबलाबलमर्दनयोगं ज्ञात्वा बीजानां धातूपधातुयोगं जानतानां बलाबले न्यूनाधिके योसौ मर्दनयोगस्तमेव कृतं ज्ञात्वा
विदित्वा रसराजे स्वेदविधानं कुर्यात् ॥ वा पुटं वह्नियोगं कुर्यात् वा यंत्रं विहितरसकर्म कुर्यात् विहितं कृतं रसस्य कर्म संस्काररूपं

551
1936

रूपं यत्र तत्रोक्तं यन्त्रभेदं यंत्रादिकमित्यर्थः ॥३६॥ सूतकर्मणि नाधिगम्यमत्वाद्गुरुपादं रूढवन्नाह ॥ सूतवरं लक्षयते बीजं नोपेक्ष
तां यथा याति ॥ तद्रूढकार्ये विधिना सूतकर्म गुरुपादनिर्दिष्टं ॥३७॥ टी० ॥ यथा येन प्रकारेण सूतवरं पारदश्रेष्ठं लक्षयते ॥ ज्ञायते सू
तकर्म रूढेतिशेषः ॥ पुनः यथा बीजं उपेक्षतां न याति सम्यक् मिलति रसे तद्रूढेनैव प्रकारेण गुरुपदनिर्दिष्टं कर्म आचार्यवर्यदर्शितं
पूर्वसंस्काररूपं विधिना आचार्योक्तविधानेन कुर्यात् ॥ गुरुपादलक्षणः सर्वशास्त्रविशेषज्ञः कुशलो रसकर्मणि ॥ एवंलक्षणसंयु
क्तो रसविद्यागुरुर्भवेत् ॥३७॥ इति गर्भद्रुतिजारणाप्रकरणं ॥ बाह्यद्रुतिप्रशंसयन्नाह ॥ बाह्यद्रुतिरति विमला स्फुरति हि केषांचिद
वसिद्धानां ॥ तेभ्यः सम्यक् ज्ञात्वा कलनाः कार्याः तथा द्रुतयः ॥३८॥ टी० ॥ द्रुतिर्द्विधोक्ता गर्भद्रुतिर्बाह्यद्रुतिश्चेति गर्भद्रुतिपूर्वमु
क्ता बाह्यद्रुतिरधुना विधीयते किंविशिष्टा अतिनिर्मलतरा एषा च पुनः केषां स्फुरति कं जानंतीति तदेषां सिद्धानां स्फुरति देवा सर्वे
द्यादयः सिद्धाः रसविद्यापारगाः नित्यानाथादयः तेषां जानंतीति तुः प्राप्यत्वात् बाह्यद्रुतिरहविरलाः पाठः इहास्मिन् ज्ञात्वा तत्
यातेनैव देवसिद्धोपदेशविधानेन बाह्यद्रुतयः कार्याः ॥३८॥ नागजारणमाह ॥ वरनागं सराजं बीजवरं सारितं तथा त्रितयं ॥ गंध
कशिखिल्लालसहितं निर्नागं दीपवर्तितो भवति ॥३९॥ बध्वा सुदृढे वस्त्रे पाटलिकायां शिखाकृतो दीप्यः ॥ तैले मग्नं कृत्वा निर्ना
गं जायते क्षिप्रं ॥४०॥ युग्मं ॥ टी० ॥ वरनागमिति वरनागं श्रेष्ठजातिसीसकं चारणयोग्यं रसराजं उक्तसंस्कारैः सूतं पारदं बीजवरं हेम
बीजं पत्रत्रयं सारितं मिलितं कार्यं पुनः गंधकशिखिल्लालसहितं गंधकं प्रतीतं शीलामनः शीला अलं हरितालं द्वे स्तानिते सहितं च
कार्यं एतत् सर्वं दीपवर्तितः दीपवर्तिप्रज्वलितयोगात् एतत् सर्वं निर्णागनागबीजं भवति नागं जरति इत्यर्थः ॥ यथा निर्नागं स्यात् तथा
विधानमाह ॥ तत्सूक्ष्मं पङ्कं ॥ सुदृढे वस्त्रे नूतने वस्त्रे अत्रोपश्लेषिके अधिकरणे सप्तमी पाटलिकायां बध्वा पुनस्तैले तैलेऽङ्गेवतप्ते
ससंस्कृत्वा पुटितं तदधः शिखाकृतो दीपो वधार्यः न शिखी शिखामुक्तः कृतः शिखाकृतः शिखावानित्यर्थः ॥ अनेन विधिना क्षिप्रं शी
घ्रं निर्णागं स्यादिति ॥४०॥ युग्मं निर्नागकरणविधानांतरमाह ॥ कृत्वा च दीर्घमूषां सुदृढ ध्मातं तु भस्मगर्तायां क्षिप्त्वा शिलाल चूर्णं
पश्चात्कृतः तथा शिलाचूर्णं ॥४१॥ संस्कृत्य भस्मनाम्नः ध्मातः स्यात् त्वांगशीतलं यावत् ॥ आकृष्य तत्र सुतं ज्ञात्वा नागं सुभक्षितं स

कलं ॥४२॥ टी० ॥ तुपुनः दीर्घास्नोस्तनाकारांव्यूढांनिव्रणवज्रोपमांमूषांकृत्वातांमूषांप्रतिशिलालचूर्णक्षिप्त्वाच शिला
मनोद्रा आलंदरितालं एतयोश्चूर्णं पश्चात्सूतं पूर्वोक्तं पारदं क्षिप्त्वा ततोनंतरं शिलाचूर्णं क्षिप्त्वातामेवसरसंयुतंमूषाभ
स्मगर्त्तायां भस्मनायुक्त्वा यागर्त्तातस्यां धातं कुर्यात् पुनस्तावत् भस्मना आछाद्य यावत्त्वागशीतलंस्वयमेव शीतलंस्यात्
तत्रतस्यामूषायां सकलसमस्तनागं भुक्तिं जीर्णतांगतं ज्ञात्वा सूतं आकृष्य उद्धार्य निर्नागंकारणविधानमेतत् ॥४३॥ नि
र्नागानंतरं यत्कर्त्तव्यंतदाह ॥ ज्ञात्वानागं त्रुटितं पुनरपिदद्याद्यथाभवेत्त्रिगुणं ॥ पश्चात्शुद्धंकृत्वाकृत्वा बीजवरं योजयेत्तत
दनु ॥४४॥ टी० ॥ नागंसीसकं त्रुटितं बुध्वापुनरपि नागंदद्यात् पूर्वोक्तविधानेन पारदं इतिशेषः तथानागं त्रिगुणितं त्रुटितं
भवेत्तथैवकुर्यात् ॥ पश्चात् शुद्धं सूतं शुद्धंवाकृत्वापारदं निर्णागं विधार्यतदनुनागजारणानंतरं बीजवरं पूर्वोक्तं योजयेत् ॥४५
अथतारयोगमाह ॥ अथवातरंगसूतं संसार्यवंगपरिहीनं ॥ तालयोगेन तथानिर्वंगं यंत्रयोगेन ॥४६॥ टी० ॥ अथवे
तिविधानानंतरं वंगं वटकाकारं तेलतिलाद्भवं पक्वं कुर्यात् ॥ नूनंनिश्चितं तद्वटकं तथापक्वं कुर्यात् ॥ यथानिर्वंगं जायते
वन्हियोगेनेतिशेषः ॥४५॥ विधानांतरमाह ॥ पिष्टीस्तंबंकृत्वाबीजवरेणवसारितं तदनु ॥ अथवाबदरसेनानुसहितं बीजसूर
ञ्जितं कृत्वा ॥४६॥ पूर्वबीजवरेणवक्तबीजेनवसारितंमिलितंसतू पिष्टीस्तंभंखाटस्तंभं कृत्वातदनुतस्य श्वात ॥ अथवेतिप्रकारां
तरंदर्शयति ॥ तुपुनः बदरसेन खोटबदरसेनसहितं सूरंजितं शोभनविधानेन वर्णस्य हीकृतं बीजं स्वर्णबीजे संयुतं कुर्यात् योगेन व
कार्यं इतिहिधानमुहूर्तं ॥४६॥ अन्यत्राचआह ॥ गंधकनिहितं सूतं निहितानिहितं शृंखलायां तत् ॥ योजितनिर्व्यूढरसेगर्भ
द्रुतिकारकं नूनं ॥४७॥ टी० ॥ गंधकनिहितंचगंधकनिहितंस्थापितंसूतं बुध्वाधोगंधकं दत्वासूतमध्यस्थं कुर्यादित्यर्थः ॥ चपुन
रवविधेसूतंशृंखलयाशृंखलीकरणयोगेनिहितानिहितंयन्निहितं निर्व्यूढंयंत्रनंतस्मिन्नेवंविधरसेगर्भद्रुतिः पारदस्यादर
बीजानां द्रवतीति ॥४७॥ पिष्टीविधिनाजारणमाह ॥ सूतकभस्मवरेणबीजंकृत्वारसेद्रुगर्भे ॥ मृदितापिष्टिविधिनाद्य
भिषवयोगाद्भवतिगर्भे च ॥४८॥ तुपुनः रसेद्रुतगर्भरसेद्रुतोयासौगर्भस्तस्मिन बीजं कृत्वा विधिनापिष्टीविधेया सापि

553
1930

पिष्टीमृदिताकार्या कस्मात् अभिषवयोगात् संमर्दनयोगात् केनसहसूतकभस्मवरेणसहसूतकस्ययद्भस्मवरेतेनसापिष्टी
गर्भद्रवतिचशब्दात्जरति ॥४८॥ बीजवरविधानमाह ॥ पत्राभ्रकंचसत्वंकांचीवाकांतमाक्षिकं पुटितंनिर्गुंडीगृहकन्याचांगेरि
पलाशशाकैश्च ॥४९॥ तावत्पुटितंकृत्वायावत्सिंदूरसंप्रभंभवति ॥ तत्सादशेषत्वर्णंहंडिकयापाकेनपाचितंसुदृढं ॥५०॥ टी०
पत्राभ्रकमिति ॥ अभ्रकस्यभ्राणिवा अभ्रकस्यसत्वं पुनः कांचीकासीसं कांतमाक्षिकं कांतचुंबकं स्वर्णमाक्षिकं इदं एकत्व
पुनः एतत् निर्गुंडीगृहकन्याचांगीपलाशशाकैः पुटितं जुषात् निर्गुंडी शेफालिका गृहकन्या कुमारी चांगेरी आम्लशा
कः पलाशो ब्रह्मवृक्षः शाकोवृक्षविशेषः इदं समासः एतपांरसंगृहीत्वापूर्वोक्तौषधपुटितं कुर्यात् इदं मितिशेषः तावदादा
तदौषधंपुटितंकृत्वापुनः तत्पुटितमौषधंतत्सादशेषंचतुर्थांशेषंवे इदत्वा हंडिकायांपाकेनहंडिकायांमृद्भाजनकेनपा
चितं वन्हौपुटितं मावत्कुर्यात् यावत्सिंदूरसप्रभं सिंदूरसप्रभं सिंदूरतुल्यवर्णंभवति । कथंपाचितंकुर्यात् सुदृढंयथास्यात्तथाद
वाग्निनेत्यर्थः ॥५०॥ एकैकंशतव्यूढं वीरवरंजायेरत्नसेंद्रस्यगर्भेद्रवतिचक्षिप्रंह्यभिषवयोगेनमृदितमंगुल्या ॥५१॥ टी० एकैक
शतव्यूढं इतिपूर्वोक्तानां सिंदूरकृतानामुपरसानामधरात् एकैकं एकैकं पृथक्कृत्वेनशतव्यूढं वाहितशतवारं बीजवरं जायतेकेन
केतिशेषः ॥ तद्बीजंरसेंद्रस्यभेगद्रवतिचशब्दात् क्षिप्रं शीघ्रं जरतिचकथं अनाभिक्या अभिषवयोगः मर्दनयोगस्तथेति
॥५१॥ कुलकं ॥ नागबीजकरणमाह ॥ आवर्त्यहेमवरेक्षेप्यमुज्वलंनागं त्रिगुणशिलाप्रतिवाद्यहिबीजंतत्समु
द्दिष्टं ॥५२॥ टी० ॥ हेमवरस्वर्णश्रेष्ठं आवर्त्यसम्यक्कृतेनिर्मलंनागं शुद्धसीसकं आवर्त्यसम्यक्कृतेनिर्मलंनागं शुद्धसीसकं
आवर्त्यप्रदातव्यंकृत्वासमंस्वर्णसमभागक्षेपंक्षिप्त्वा पुनः नागोपरि त्रिगुणं शिलानागात्त्रिगुणाद्याशिलातस्यानिर्वाहं कु
र्यात् मनः शिलानिक्षेप्यति तत्सिद्धं अयंबीजंनागयोगेनबीजंसमुद्दिष्टं रसषड्भिरितिशेषः ॥५२॥ अथवंगयोगेनबीजमाह
॥ वंगंतुतेनविधिनाहेमवरेपूर्वोक्तंवंगं क्षेप्यतालकवापेनहरितालनिक्षेपेननिर्व्यूढं कुर्यात्वातात् आवर्त्यवंगं निक्षिप्यनिर्व्यूढ
निर्वाहितंसततं बीजवरंभवतकस्मात्तुत्रुटितसंयोगात् त्रुटितंभवतितथाबीजकरमितिवंगबीजमेतत् पूर्ववत् द्रवंतिजरति

अथबीजप्रशंसनमाह॥ योनिः सूतो भुजंगोद्रसकेसरी वज्रपंजरः सपुनः॥ फणिहेमगुणात्कुटिलो रसो कुंशो नामाव
ख्यातः॥५४॥ टी० सुवर्णाभिधानभुजंगात्सीसकात्निसृतः भुजंगः शिलावापनक्षयं नीत्वायः पृथक्भूतः रसके
केसरी वज्रपंजरः कथितः रसएवकेसरीसिंहः तदर्थवज्रपंजरः हेमबीजवज्रपंजर गुजोकुशदर्शनात् भ्रांतिर्जातेति॥
॥५४॥ बीजस्यापिपिष्टीकरणमाह॥ एकपक्षविधिना वज्रेणव्यथितः पंजरंकरोति पृष्टत्वात्सिंहरक्षणसमर्थइत्यर्थः
॥पुनः विशेषणाच्यते॥ अयं वज्रपंजरोनामयंरसोकुशवारसोगजरूपः तस्यांकुशवशीकरणसमर्थः नामसंभावनाद्य
विख्यातः प्रथितः कस्मात्कुटिलात्किमपि वस्तुहरणात्कुटिलोवक्रोभवतिदुष्टः स्वभावएव अनेनहेम्ना नागंहरणक
तंकथंभूतात् फणिंभुजंगः हेमस्वर्णतया गुणाविद्यतेयस्मिन्एवंविधात्कुटिलादृशोयुक्तः अंकुशाक्रिवक्रोभवतीति॥ पुनः स
एवंज्ञायमन्यः भ्रांतिमानमलंकुरुः हेमबीजे वज्रपंजरगजांकुशदर्शनात् भ्रांतिर्जातेति॥५४॥ बीजस्यापिपिष्टीकरणमाह॥
एवंपक्षविधिनाबीजवरं सूतराट्तथा म्लेन॥ कर्तव्यः संस्वेद्योयावत्पिष्टीभवेत् श्लक्ष्णा॥५५॥ टी० अमुनाप्रकारेण
विधिनाकर्तव्यार्थोपदेशेनपक्षयद्बीजवरं तथापूर्वसंस्कृतः सूतराट्पारदः अम्लेनजंबीरादिनास्वेद्यः॥ स्वेदःस्यायविधिः
कर्तव्यअत्रकिमिवधिस्तुकर्तव्यायावत् श्लक्ष्णा स्पष्टापिष्टी एकशरीरताभवद्रसबीजयोरितिशेषः॥५५॥ विध्यंतरमाह
तैलेन॥ तेनविधिनाखिन्ना स्वेदितासति पिष्टीभवति वन्हावितिशेषः॥ अथकेचिद्विधानांतरं दर्शयंति॥ शिलायादृपन्म
यानिपृष्टबीजंतत्निपृष्टे घर्षितंया द्वीजंनागास्व्यंतत् सूतेनतिशेषः अखिलंसमसंयथास्यात्तथापिष्टिर्भवतीवेति॥५५५
यथावटकोपाच्यंतथाह॥ पाद्यावटकविधानेकर्तव्यस्तेनयोगेन क्रामणपिंडे क्षिप्त्वा माषश्चस्यात् मृद्दृढपिंडत्वं॥५७॥ तैलयो
गेनवटकविधानेन माषवटकविधोपाकः कर्तव्यः वन्हौपाचनंविधेयमित्यर्थः किंकृत्वा क्रामणपिंडे क्षिप्त्वाबिडपिंडमध्ये
वन्हिविधानमाह॥ मृद्वग्निनासुपक्वंदग्धंयाचनतद्भवेत्पिंडे आरूढ्यमूर्तपिंडेशेषं तथापुनः पाच्यं॥५८॥ टी० तन्माषचूर्णित
जातं क्रामणपिंडे तावत्सुपक्वंकर्तव्यं याचदग्धेनभवेत्॥ केनसुपक्वंमृद्वग्निनाकेवलावन्हिना पुनटः तत्पिंडतः शेषं स्वरुठस्तत

555
1936

निर्मलंपारदं आरूढ्यगृहीत्वापिंडे अन्यस्मिन्पिंडेतथापूर्वप्रकारेणपाच्यमिति॥५८॥ अपरंचाह॥ अथवाप्योषधपिंडे दोलाय
तेसुखर्परोविधिना॥ पुनरपिपिंडे क्षेप्यंगर्भेणवयाद्भुतिभवति॥५९॥ टी०॥ अथवेतिप्रकारांतरे पुनरपिपिष्टीदोलानले औ
षधपिंडदोलयोः तस्मेउद्धतानीति क्रामणौषधमांपिंडेक्षेप्यमध्यरुद्धापक्वस्योपरि खर्परमृन्मयपात्रपिंडा परिकेनविधिनापूर्वोक्त
नतेलेनवा अम्ले नीतिकियत्कालंयावद्भूरसादरपिष्टीर्भवतितद्विज्ञांतरपिंडांतरे क्षेप्यतितात्पर्यार्थः॥५९॥ अपरंचाह॥ एवं
द्भुतंहिगर्भेरसादरजरतिनिःशेषत्वे आज्ञातिचपुनः गर्भद्भुत्यारहितेरसादरद्रवेण वर्जितंवीरवरं विडेर्जरति द्भुतबीजमारणस
मर्थाबीडउत्यर्थः॥५९॥ द्भुतग्रासपरीणामोविडयंत्रादियोगतः॥ जारणत्वच्यतेतस्याः प्रकाराः संति कोटिशः प्रकारानेत्रणा
दिशेषः जारणभेदास्तुयोसस्य चारणंगर्भद्रावणं जारणंतथाइतित्रिरूपा निर्दिष्टा जारणावरवातिके॥२॥ इतिरसहृदयेद्भु
तात्मकः पंचमावबोधः॥ ॥श्रीः॥ ॥१०॥ अथवेधविधानमाह॥ व्यवस्थिभेषजोपेतो द्व्यक्षितरसः
खलु॥ वेधइत्यच्यतेतज्ज्ञैः सचानेकविधः स्मृतः निमित्तमादायसतांपुरास्यश्रीभारतीभावरसेन हृष्टः सिंचतिजगतिवस्तुधा
॥संस्कारधिकारमाह॥ अनयारवलुसारणया क्रामणं चदिग्वसतियोजितोविधिवत्॥ असौतवेध
विधोनरसस्वगुणान्प्रकाशयतीति॥९॥ वेधविधानमाह्युगंरसदरदताप्यगंधकमनः शिलारान्नावर्त्तकंविमलंपुटमृतशुल्बे
तारंनिर्व्यूहंहेमरूपिरयं॥२॥ इतिहेमरूपिः स्वर्णकारणं॥ वेधविधानमाह॥ अष्टानवतिभागास्तारस्येनथैवशुल्बस्यकनक
स्यकोभागावेधश्चैकेनसूतस्य॥४॥ पूर्वोक्तविधिविशेषमाह॥ अर्द्धनिमिश्रयित्वा एवंसहस्रवेधीनियुज्यतेकेदिवधीन्च॥ जारणबीज
वशेनमुसूतस्यचंचलेज्ञात्वा॥५॥ विशेषणवधविधानमाह॥ दत्वादौप्रतिवापं लाक्षामल्यादिपित्तभावनया॥६॥ टीका॥ मत्स्यामा
हिषमाचूर राजसूकरसंभवा॥ निति॥ शुल्बप्रतीवापं तारवा अथाथ कस्तेहिमकरणे नियुज्यते॥५५ विशेषाह॥ तदनु क्रामणम
दिवेतत्कलापिपिंडितरसेन अतिद्रुतेचतस्मिन्वेध्यासौकुंतवेधेन॥७॥ मत्स्यादिपित्तभावन यालाक्षानंतर लाक्षाकल्कांतरसक
ध्यरिकदरस्कतेलंडगोपाद्यै मृदितसतिपीडितरसे तारे शुल्बेतारारिष्टे विद्रुतंजलरूपे असौकुंतवेधः कार्यः॥७॥ विशेषमाह॥

नेलाऽपटेनरुद्धगयेत् पल्लवेन भस्मना वापि ॥ विधिवद्वेध्यं द्रव्यं द्रव्यरसराजा-क्रमणार्थं हि ॥ ८ ॥ टी० वेधोभितं द्रव्यं मारणानैलाद्युपलेपनकेनचिमांशेन वा भस्मना वा छादयेत् ॥ ८ विशेषमाह ॥ शीतसारितस्य कथितं रसबंधादिप्रावणं कर्म पादादिजीर्णबीजं संयुज्यते पत्रलेपेन ॥ ९ ॥ टी० ॥ पादादिजीर्णबीजं पत्रलेपनयुज्यते पत्ररंजनं स्यात् ॥ ९ ॥ पत्रवेधनमाह ॥ आम्लाद्युद्वर्त्तितताम्रपिष्टं दिपत्रमतिशुद्धं आलिप्य रसेन मतः क्रामणलिप्तं पुटे पुटे श्रान्तं ॥ ९ ॥ टी० ॥ आम्लाद्युद्वर्त्तितसिणस्वर्णरसेनालिप्य क्रामणपिंडेन लेपकृते सति पुटे पुटे उत्पलाग्निविश्रान्तस्ताप्यं कुर्यात् पत्ररंजनविधिरयं ॥ ९५ ९७ ॥ अथ स्वर्णविधानमाह ॥ अर्द्धनिमश्रयित्वा हेम्ना ज्यष्टेन तद्दलं पुटितं । क्षितिरवगपटुरक्तमृदा वर्णपुटाद्यंतनोदयं ॥ ९९ ॥ टी० ॥ प्रवरहेम्नादलं रजतपत्रैः श्रयित्वा क्षितिरवगपटुरक्तमृदा स्थापितं पिष्टलिप्तदलं वनास्तलनपुटोदयः ॥ ९९ ॥ वर्णविधानमाह ॥ भूपतिवर्त्तकमक्षचूर्णं त्रिरिपुपुष्परसभावितं बहुशः ॥ सद्यः करोति रक्तं सितकनकमशीतिभागेन ॥ ९८ ॥ अन्यच्चाह ॥ रसदरदविमलताप्यसेधवशिलाम्राक्षिकत्रपाश्चैव ॥ प्रवालकं कुष्टटंकणगैरिकप्रतीवापितं सितं कनकं ॥ ९३ ॥ अन्यच्चाह ॥ नापीभवनपावर्तं बीजपूररसार्दितं करोति पुटपाकं हेमसिंदूरसन्निभं ॥ ९४ ॥ टी० ॥ नापीभवं माक्षिकं सत्वं राजावर्त्तं एताभ्यां हेम्नो वर्णपुटपाकेन सिंदूरसंनिभं ॥ ९४ ॥ तारवर्णविधानमाह ॥ वंगाभ्रसितमाक्षिकं शैलं वाहयेत् सितं । तत्तारं चदशांशेन तारात्कर्षं करोति हि ॥ ९५ ॥ टी० वंगाभ्रं श्वेतशिलाजतुएतद्दोषधनिचयं तारतो दशमभागेन हेमवर्णतारं उत्तमं प्रतीवापनं करोति ॥ ९५ ॥ ॥ तारविशेषमाह ॥ नागः करोति मृदुतां निर्व्यूढसारं रक्ततां च रविः ॥ तां पीततां च क्षीणां कांचनतालिकां विनाशं च ॥ ९६ ॥ टी० ॥ सीसमारं निर्व्यूढं कोमलत्वं पुनस्तां मृदुतां प्रतिताम्रं निर्व्यूढं रोहितत्वं ॥ पुनस्तां मृदुतां प्रीततीक्ष्णसारं निर्व्यूढं पीततां ॥ पुनस्तां मृदुतां प्रतिकांचनं निर्व्यूढं तालिकाविनाशनं तारं करोति इति संबंधः ॥ ९५ ॥ हेम्नः विशेषमाह ॥ कनकाकर्षसमं माक्षिकं रजतं तथा पुनर्ध्मातः ॥ पातेऽदशावनाकर्षं वदंति यावद्धि कोटिमपि ॥ ९७ ॥ टी० ॥ कनकं ताम्रं माक्षिकं समभागः करं जतं तथा पुनः ध्मातः कार्यः वारंवारं निक्षेपमतिदशवर्षात्कर्षं वियदंतिकियत्कालं हि निश्चितं यावत्कोटिसंख्यां विंदति ॥ ९७ ॥ विशेषमाह ॥ सश्वा यं हेमविलीनं कुंगुणीतलसंचितं

557
1936

बहुशः ॥ माक्षीकरविनिर्वार्यं विध्यति कनकं शतांशेन ॥ ९८ ॥ टी० शुल्बहतं रसगंधं शुल्बेन सहहतं यत्तु रसगंधं सूतगंधहतं रवपीतं दशांशेन ॥ विध्यति कनकं कुरुते तद्धूढं मर्दितं सुदृढं ॥ ९९ ॥ टी० ॥ शुल्बहतं रसगंधं शुल्बेन सहहतं यत्तु रसगंधं सूतगंधहतं रवपीतं पंचत्वमापन्नं पीतकासीसं च पुनरेतद्दोषधसमुच्चयं सुदृढं यथा स्यात्तथा मर्दितं कुर्यात् पुनस्तं निर्व्यूढं दशांशेन विध्यति सकनकं स्वर्णं करोतीति शेषः ॥ ९९ ॥ अन्यच्चाह ॥ रसकसमं सुध्मातं कनकं भुक्तं तदर्कचंद्रलेपनमाक्षिकसत्वहेम्ना करोति जीर्णः रसांशतांशेन ॥ २० ॥ टी० ततोनंतरं अर्कचंद्रलेपनसहस्रकं समं ध्मातं कुर्यात् । पुनरेवं कुर्यात् भुक्तं कनकं स्यात् पुनः माक्षिकसत्वहेम्ना सह जीर्णः रसशतांशेन विध्यतीत्यर्थः ॥ २० ॥ अन्यच्चाह ॥ अष्टगुणं मृतशुल्बं कलधौतं भूकभूषयालिप्तं ॥ तत्षोडशांशजीर्णं विध्यति तारं शतांशेन ॥ २९ ॥ टी० ॥ अरिवर्गेण मृतं शुल्बं अष्टगुणं तत्कलधौतेन षोडशांशेन जीर्णं त्रिः शतांशेन पंचाशद्भागेन तारं विध्यति कनकं करोतीत्यर्थः ॥ २९ ॥ अन्यच्चाह ॥ आदित्यकनकरिणोः समशीलया प्रतिवापितौ ततो भुक्तौ ॥ दोलायंत्रे गंधकजीर्णं सारं दशांशविधी स्यात् ॥ २२ ॥ टी० ॥ कनककरिणोः समानौ गात्रयित्वा समशीलया ॥ प्रतीवापितौ ततो नंतरं कनककरिणौ भुक्तौ दोलायंत्रे गंधकजीर्णं रसः सतारं दशांशविध्यतीत्यर्थः ॥ २२ ॥ अन्यच्चाह ॥ रिपुनिहितलोहपटुः स्वर्णतारताम्रनागवंगलोहाभिधानं तत्चतुर्मासं धान्यस्थं कोष्ठे धृतो रसो जीर्णः कार्यः किंविशिष्टो धान्यरतः पुरः सुराभ्यां गुगुलुमदिराभ्यां सहितो मलितः शतांशेन कार्यं कार्यं विध्यति कनकं करोतीत्यर्थः ॥ विशेषमाह ॥ वक्ष्ये संप्रति सम्यक्त्वा द्वीजं समरसं जीर्णं ॥ पिष्टिस्तंभादिविधिप्रकाशमानं बुधाः शृणुत ॥ २४ ॥ टी० यद्बीजं तुल्यसूतेजारणमापन्नं सम्यक्तदहं गोविंदनामा वक्ष्ये पिष्टिस्तंभादिविधिपाटखोटजलौकारव्यं कथयामि ॥ २५ ॥ अथ नागमाह ॥ राजावर्त्तकविमलं पीताभ्रगंधताप्यरसकश्च ॥ कांक्षीकासीसशिलादरदं श्वसमन्वितो नागः ॥ २५ ॥ टी० राजावर्त्तकश्वेतमाक्षिकं पीताभ्रगंधकस्वर्णमाक्षीकं स्वर्णकांक्षी ॥ पीतकासीसमनःशिलाहिंगुलं एतैश्वसमन्वितं नागं कुर्यात् ॥ २५ ॥ तच्चाह ॥ अहिमाररसैः पुटितं मारयेन्नागं निरुत्थकं यावत् ॥ तदनुचतस्यहिमध्ये शुल्बं गंधं चलवकं कुरुते ॥ २६ ॥ टी० ॥ पूर्वविधसंयुक्तं नागं कुरवीरस्रवैः पुटितं कुर्यात् इत्यध्याहार्यं ॥ २६ ॥ तच्चाह ॥ तत्सर्वं शतवारान् भावयेत् पद्मार्कपत्रसलिलैश्च ॥ घोषाकृष्टे शुल्बे चूर्णं निर्वाहयेत् शतशः ॥ २७ ॥ टी० ॥ तत्पूर्वोक्तं यन्नागमितं कलकं पद्मार्कस्य पत्रसलिलानीतैः कृत्वा भोरमज्ञातशतवारान् भावयेद्धर्मपुटैः कुरुते तद्भक्तिं चूर्णं घोषाकृष्टे कार्यं स्यात् समुद्धृते शु

र० हृ०
२९

ल्वेनाम्रेशतशः शतवारं निर्वाहयेत् ॥ गलितोपरि निक्षिपेत इति ॥ २७ ॥ शुल्बेन तेन हि समं रसकं पीताभ्रसत्वविमलं च ॥ गैरिकमा
क्षिकसत्वं टंकणनागं च तीक्ष्णयुतं ॥ २८ ॥ टी० ॥ तेन शुल्बेन शतशो निर्वाहितताम्रेण समं तुल्यभागं रसकं पीताभ्रसत्वविमलं
च गैरिकं माक्षिकसत्वं गैरिकं प्रतीतं माक्षिकसत्वं ताप्यसारं एतच्च समे टंकणं सौभाग्यं नागं सीसकं तीक्ष्णसारं सर्वं समसंयुतं युज्यते इति
शेषः ॥ २८ ॥ एतद्ठंकं कृत्वा माक्षिकवापेन रंजयेत् शुल्बं ॥ वारांश्च विंशतिवारान् माक्षिकवापितं रंजयेत् ॥ शुल्बमपि गलितं जलस्य
वक्ष्यमाणौषधैः सिंचयेत्तदनु ॥ २९ ॥ सेचनौषधनान्याह ॥ निर्गुंडीकाचमाची गृहकन्यारसमेलनं कृत्वा सप्तवारान् विधिनाऽऽदितयु
ग्मं तदपि च हेम्नि शुल्बे च निर्वाहयेत् बीजवरार्थमिति शेषः ॥ ३० ॥ तच्चाह ॥ यावच्चतुर्विंशतिगुणो बीजवरं रंजयत्तच्च ॥ यत्का
माक्षिकमेव हितेन च विधिना तदपि च चतुर्विंशगुणं ॥ ३१ ॥ टी० ॥ यावदित्यविधौ तत् शुल्बं तावद्वेम्नि निर्वाहयेत् ॥ यावत् चतुर्वि
शतिगुणं समाप्नोति तद्बीजवरं स्यात् ॥ पुनः तद्बीजवरं संजवं रंजयेत् ॥ रंजकं भवेदित्यर्थः ॥ च पुनस्तेन विधिना शुल्बविधानेन हि चतु
र्विंशतिगुणं माक्षिकमेव हितं हेम्नि यत्कातदपि बीजवरं स्याद्रंजयेच्च ॥ ३१ ॥ तद्बीजं लघुमात्रं रसराजसंस्कृतं पूर्वं ॥ मूषामादावपि
तदपि बीजवरं स्याद्रंजयेत्तच्च ॥ ३२ ॥ तद्बीजं लघुमात्रं रसराजसंस्कृतं पूर्वं मूषामादावपि द्वादशगुणा गंधकं दाह्या ॥ ३३ ॥ टी० ॥ तद्बीजं
लघुमात्रं रसराजसंस्कृतं पूर्वं रसराजे षोडशसंस्कारैः विशुद्धे पूर्वं लघुमात्रं अल्पपरिमाणं मूषायां प्रतिदत्वा पुनः द्वादशगुणा च गंधकं
दाह्यं रसेऽद्रेत्यर्थः ॥ ३३ ॥ तच्चाह ॥ अथवा वालुकयंत्रे सदृढे चतुर्दशांगुलमूषायां मध्ये सूतकं युक्तं लघुतरपुटयोगतो विहृता ॥ ३३ ॥
टी० ॥ अथवेत्यारंभे सदृढे कठिणे वालुकायंत्रे चतुर्दशांगुलमूषायां मध्ये सूतकं युक्तं लघुतरपुटयोगतः अतिशयेन ॥ अथापि
ष्टविधानमाह ॥ तेन सर्वबीजवरे पिष्टिः पादांशतः कार्या ॥ अंगुलीनवपरिमाणां तां मूषामध्ये च पिष्टिकां दत्वा ॥ ३४ ॥ टी० ॥ तेन गंध
कजारितेन सूतेन समासार्द्धपादान्वितबीजवरे कनकबीजसंमितपिष्टिः कार्या च पुनरंगुलीनवपरिमाणं मूषामध्ये अंगुलीनवपरिमा
णं यस्य तस्मिन्नेवंविधे मूषामध्ये पिष्टिं दत्वा पिंडतः कार्येति शेषः ॥ ३४ ॥ पिष्टीवेष्टनार्थं पिंडमाह ॥ निर्गुंडीकाचमाचीगोजिह्वाद्वि
धिकास्त्रा गृहकन्यामधुसैंधवं पिंडे रापिसमं तत्तरुत्वा ॥ ३५ ॥ टी० ॥ निर्गुंडीशेफालिकाकाचमाचीवामसीगोजिह्वा प्रतीता द्विधि

२९

कायारस्कारस्कवर्णा गृहकन्यकाकुमारीकामधुक्षौद्रसैंधवं लवणं एषां पिंडैः कृत्वा समं तत्तोभितः छाधा कार्या अष्टाद्येति शेषः ॥ ३५ ॥
जारणायां कलकमाह ॥ ताभ्यां पुटयोगेन यावद्दृढतां समायाति षड्गुणगंधकं तालकं कांक्षीकासीसलवणकक्षारं ॥ ३६ ॥ टी० ॥
ताभ्यां मूषापिंडाभ्यां पुटयोगकर्वन्हिपुटेन यावद्दृढतां कार्यिण्यं समायाति तावत् इदं वक्ष्यमाणं तदेतत् षड्गुणगंधकं तालकं
कांक्षीकासीसलवणक्षारं गंधकः प्रतीतः तालकं हरितालं कांक्षी वणिक्द्रव्यं कासीसं पीतकासीसं लवणं सैंधवं पंचलवणं
लवणपंचकं वा क्षारं स्वर्जिकादिदेहदित्यपाहार्यः सर्वत्र षड्गुणसंबंधः ॥ ३६ ॥ तच्चाह ॥ ताप्यं तत्सर्वं समं देयं बाह्यं तदौषधैः
पिंडैः षड्गुणसहितं पिष्टियंत्रे थकुठेपे दत्वा ॥ ३७ ॥ टी० ॥ ताप्यमिति स्वर्णमाक्षिकं तत्सर्वं समं तत्सर्वं समं तस्य पूर्वोक्तस्य तु
ल्यं देयं पुनर्बाह्यं पिष्टी परतः औषधिपिंडं देयं किंविशिष्टं ताप्यं षड्गुणसहितं षड्गुणं यत्पूर्वोक्तं यौषधं तेन सहितं षड्गुणमपि ताप्यं त्रा
ह्यं एवंविधा पिष्टी अथ सिकतारव्ययंत्रानंतरं कठपिकूर्मा कर यंत्रे दत्वा स्यदगामि श्लोकसंबंधात् ॥ ३७ ॥ तच्चाह स्वेद्यं पुटयोगेन
तु त्रिदिनं घटिकात्रयं त्रयं यावत् ॥ तत्पृथ्यतो यत्नात्पिष्टा मूषा रुचूर्णितं कृत्वा ॥ ३८ ॥ टी० ॥ स्वेद्यमिति ॥ कठपयंत्रमितः स्वेदो
भवेदित्यर्थः ॥ ३८ ॥ विशेषमाह ॥ समबीजेन तु सार्यं नागं त्रिगुणं ततः समुत्सार्य प्रतिसारणा च कार्या जारितसूतेन बीजयुक्तेन ॥ ३९ ॥
॥ टी० ॥ पूर्वं पिष्टी स्मितः सूतोयः समबीजेन तुल्यभागकनकबीजेन प्रतिसारणा जारणा जारणां प्रति या सारणा द्विगुणबीजसारणा रूप
कार्येति शिष्टाचारः ॥ ३८ ॥ विशेषाच्चाह ॥ समबीजेन तु सार्यं नागं त्रिगुणं ततः समुत्सार्य प्रतिसारणा च कार्या जारितसूतेन बीजयुक्तेन ॥ ३९ ॥ टी०
लक्षण पश्चात् प्रतिसारणानंतरं अनुसारणं च कार्यं ॥ ३९ ॥ अनुसारणमाह ॥ अनुसारणा च पश्चात् त्रिगुणं बीजं भवेद्यत्र प्रागुक्तं तस्योपरि मृतनागं शतगुणं वाऽपि
इति तेन च घोषाकृष्टे शुल्बे वेद्याथ सप्तशतैः ॥ ४० ॥ टी० ॥ तेन सिद्धेन सूतेन घोषाकृष्टे कांस्योध्वंते शुल्बे तान्येव सप्तशतैः सर्वथः कार्य इति शेषः ॥ ४० ॥
अथ क्रामणमाह ॥ क्रामणमेतत् प्राग्पि माक्षिकदरदगंधकशिलाभिः राजावर्तकीविमलप्रवालकंकुष्टतुथविषैः ॥ ४१ ॥ कांतगैरिकटंकणभूमि
लुतारीश्वरशंखगोपरसैः ॥ महिषीकर्णमलभृतलोहं वायसेरयं विष्टच्च ॥ ४२ ॥ पारावतविष्ठास्त्रीपयोसर्वं मेकृतः कृत्वा ॥ क्रामणकल्कं चेत्ततः शुनवारा नर
क्रपीतगणैः ॥ ४३ ॥ टी० ॥ एतत् क्रामणमिति नागारब्धं प्राग्पि प्रथमं पिष्टं दत्वेति शेषः ॥ पुनर्वक्ष्यमाणं क्रामणगुणं कुर्यादित्याहरः ॥ सकथं तथाह ॥ माक्षिक
त्यादि माक्षिकं वाप्यं दरदं हिंगुलं गंधकः प्रतीतः शिलामनोह्वानाभिः ॥ पुनः राजावर्तकः इत्यादि राजावर्तकं राजावरदं प्रतीतं भाषायां विमलं मतं माक्षिकं प्रवालं

विडुमंकुष्टविरंगतुत्थकांत्रारिवरिवरीवंविषंसकुक्कादिकंएतेश्वकांतउत्यादि२कांतचुंबकंगैरिकंप्रतीतंटंकणंसोभाग्यंभूमिलताभू
नागःरुद्रिरशंकगोपःरसोविषंपुनरुक्तादिषमत्रद्विगुणंतेश्वपुनर्महिषीणांकर्णमलेहयारिपपत्नीनांश्रवणयोर्मलामितेः मतलोहम
तश्वासोलोहश्वेतिवायस्यसकाकस्यविष्टाशकृत्पारावतस्यविष्टकपोतशकृत् स्त्रीपयोनशिक्षीरंएतत्सर्वंमाक्षिकादिस्त्रीक्षीरांतमिकतः
कृत्वामिश्रितंविधायच॥ एतत्क्रामणकल्कंपीतगणैःकिंशुकाद्यैःहरिद्राद्यैः शतवारान्भावयेत्इत्यागमिसंबंधात्कुलकं ॥४३॥जा
रणकल्कविधानमाह॥भाव्यंकंगुणितेलेकांचीपितभावनाःसप्त॥कल्केनपचेत्सारितपिष्टंचहंडिकायां॥४४॥ टी०॥पूर्वोक्तंसारण
कल्कंकंगुणितेलेज्योतिष्मतीतेलेभावनासप्तदातव्याःपुनःसारितपिष्टीसारितायारसेंद्रयारसेंद्रबीजपिष्टीसप्तमनेनहंडिकायांपचेत्॥
वन्हिनापाकःकर्तव्यः॥४४॥सारणकल्कपाचनमाह॥यावद्रसाद्रवतिहिगच्छतिनागंसमुन्नार्य॥तावत्क्षेपक्षेपेणसर्वस्मिन्सारणाटोच॥४५
टी०॥पूर्वकल्कसंयुतांपिष्टीक्रियत्कालंपचेत् यावद्रसकाभवतिनागंचगच्छतिनागनाशःस्यात् नागंगच्छतिसति समुन्नार्यपुनःतावत्सर्वस्मि
न्सारणादोचक्षेपकमणचक्षेपक्षेपेण॥४५॥एवंहिकोटिवेधीरसराजःकामतोभूत्वा॥पुरंवादेउद्धरयप्रदोभूत्वाविपुलान्विशालान्ददे
॥४६॥टी०॥कथंश्रावपर्यंतंखेचरंयथास्यात्तथा आकाशगमनपर्यंतंभोगान्ददातीत्यभिप्रायः॥४६॥पिष्टीविध्यंतरमाह॥आभ्रक
माक्षिककनकंनागयुतंमिलितंविधिना॥सूतःपिष्टीकार्यादिव्योषधियोगतःपुटिता॥४७॥ टी०॥अभ्रकमितिप्रतीतंमाक्षिकंकनकता
प्यंकनकंहेमनागयुतंयोगतःपुटिताकार्यानागेनसीसकेनसहितंविधिनाकर्तव्यापदेशेनएतत्सर्वंसूतेमिलितंसतिपिष्टीकार्यापुनः
दिव्योषधियोगेत॥४७॥तारहेमाकृष्टिमाह॥षड्गुणगंधकदाहःशिलयानागंसमुन्नार्य॥तारहेमाकृष्टिमिलितास्यात्षोडशांशेन॥४८॥टी०
पूर्वोक्तायांपिष्ट्यांषड्गुणगंधकदाहःकार्यःपुनःपुनःषड्गुणशिलयाकृत्वानागंसमुन्नार्यसीसकंअपहायसानिष्पन्नापिष्टीषोडशांश
नतारारौप्यमिलितासतिहेमाकृष्टिःस्यात्॥कनकोद्धारणंभवेत्॥ताम्रनागादिधातुषुहेममिलितंनभवेततःआकृष्टशब्देयुक्तः॥४८॥ना
गमारणविधानमाह॥माक्षिकनिहितंशुल्बंशिलयासहितंचनागनागतुल्यांशंपुटितंजंबीररसैःसहितंसैंधवसहितंपचेत्स्वाल्यां॥४९॥टी०
माक्षिकेत्यादिमाक्षिकेणनिहितंमारितंयत्शुल्बंशिलयानागंचशिलयामनःशिलयानागंचनिहितंमारितंमारितनागंउभयंतुल्यांशं

561
1936

समभागंकार्यंपुनर्जंबीररसैःजंबीरद्रावैःसैंधवसहितंउभयंपुटितंभावितंसत्पचेत्वन्हिनापक्वंकुर्यात्कस्यांस्वाल्यांमृद्भाजनेइत्यर्थः
॥४९॥नागतारहेमाकृष्टिमाह॥तच्चूर्णंतीक्ष्णंदरदेननिहितसमभागं॥एकीकृत्वापुटयेत्पचेन्मातरसेनैव॥५०॥टी०॥बलिना
गंधकेननिहितंसत्समभागंतुल्यांशंकुर्यादितिशेषः उभयमेकीकृत्यसंमिश्र्यमातारसेनैवनारीक्षीरेणपुटेत्पचेदितिश्लोकार्थः॥५०
हेमाकृष्टिविधानमाह॥तारव्यूढंत्रिगुणंमार्जाराक्षीनिभंभवेत्तच्च॥लिप्तंरसेनपुटितंहेमाईनमात्रयातुल्यं॥५१॥टी०॥पूर्वपक्व
कल्कंचूर्णंशुल्बजंतीक्ष्णजंतारंत्रिगुणंव्यूढंवाहितंसत्मार्जारक्षीनिभंअतुनेत्राभंतारंभवेभवेत्हेमाईनमात्रायातागईभागेनपरिमा
णेनहेम्नातुल्यंअनूनाधिकंरसेनपयसा॥५१॥पुनर्नागविधानमाह॥ लिप्तंतदनुपुटितंनागंहिरसेनपादयुक्तेनरवर्परकल्कंरुद्ध
त्वाकार्यंविधिनादृढनोप्यं॥५२॥टी०॥त्रिगुणंयथास्यात्तथाशिलयापादयुक्तेनरसेनचतुर्थांशसहितसतेनसहनागंसीसकंखर्परकल्कं
मृद्भाजनखंडिस्थितंकृत्वाविधिनासंज्ञोपदेशेनदृढताप्यंसत्वन्हियुतंसत्निहितंकुर्यादिति वाक्यार्थः॥५२॥तच्चाहनिर्गुंडी॥श्ल
क्ष्णं॥ता०॥द्यावत्॥निर्गुंडीरसभावितपुटितपुटितशिलयावर्त्तितंदृढंश्लक्ष्णं॥तावन्मृदितपुटितनिरुत्थभावंव्रजेद्यावत्तच्चाहपक्वं
नागचूर्णंश्रेष्ठविधानंयथास्यात्तथाशिलयावर्त्तितंतत्निर्गुंडीरसभावितंपुटितंपूर्वभावितंघर्मपुटितंपश्चात्पुटितंवन्हिपुटितंकुर्यात्पुनः
यावन्निरुत्थभावंअशरीरत्वंव्रजेत्तावन्मृदितंपुटितंमर्दितपाचितंकुर्यादित्यर्थः॥५४॥तच्चाह॥तारतन्निर्व्यूढंयावसीतंभवेदुचिरं।हेम
समेनचमीलितंमात्रातुल्यंभवेत्कनकं॥५५॥टी०॥निरुत्थनागचूर्णंयावसीतवर्णंतारंभवेत्॥तावत्तारेनिर्व्यूढंकुर्यात्पुनःहेमसमेन
कनकतुल्यांशेनमात्रातुल्यंमिलितंसत्रुचिरंमनोहरंमंकनकंसर्वेभवेदित्यर्थः॥५५॥ताप्यविधानमाह॥ताप्यंचांगुलिसंज्ञंचूर्ण
कृत्वातदनंतरंदत्वा॥शुल्बस्यगुप्तमूषाकार्यापुटिताथचध्माताः॥५६॥टी०॥अंगुलिसमंताप्यंमाक्षिकंचूर्णंकृत्वातत्तानंतरंतच्चूर्ण
तारेदत्वारलयोरक्यातलेइत्यर्थः॥शुल्बस्यताम्रस्यगुप्तमूषाअधमूषाकार्यतत्रनल॥इत्यभिप्रायः सामूषापुटिताध्माताकार्याविधा
नमुक्तं॥५६॥तच्चाह॥हेम्नामिलितंविधिनामात्रातुल्यंभवत्येव॥पादादिजीर्णसूतेलिप्तेपत्राणिहेमकृष्टीणां॥५७॥पक्वंयन्मा
क्षिकंचूर्णंतद्धेम्नाकृत्वापादादिजीर्णसूतपादादिनापादार्धसमानादिनाजीर्णयोसौसूतःतस्मिन्हेमकृष्टीनांपत्राणिकुरुपकनकानांपत्राणि

लिप्ता क्रामणयोगेन लेपयेत् इत्यागामिश्लोकार्थेन ॥५७॥ तच्चाह ॥ क्रामणयोगेन ततो विलिप्य विधिनानिधाय तुल्याध:
पश्चाधिष्मासहितं ध्मातं मूषादरे समाहृत्य ॥५८॥ टी० ॥ ततो रसलेपानंतरं क्रामणयोगेन कुनटीमाक्षिकविषमित्यादिना विलिप्य
तुल्याध: तुल्यं यथा तथा ॥ अधोभागे निधाय मूषादरे ध्मातं कुर्यात् ॥ पुन: पश्चाद्दम्ना कनकेन सहितं आवृत्य ध्मातं कुर्यात् ॥५८॥
॥ तच्चाह ॥ यन्त्रं दृढ्यापक्वं पंचमृदावाप्य पुटपक्वं वक्ष्यामि चलपविधिं क्रामीति सूतो यथा हि पत्रे पुरंजयति तेन विधिना समासत: सू
तराजस्तु ॥५९॥ टी० ॥ वाथ यंत्रं पंचमृदा वल्मीकमृत्तैरिकं । खटिकं सैंधवं चश्रिकासमामिति पंचमृदा कृत्वा हृढ्या स्थाल्यां पक्वं कार्यं
अथ पुटादिना भाव्यमित्यर्थ: ॥ लेपनविधिं वक्ष्यामि यथा पत्रे पुलेप: कार्य: पुनर्यथा पत्रे पुक्रमति स्वगुणान् प्रकाशयति पुनर्येन
विधिना रंजनगंददातीति समासत: संक्षेपविधानत: सूतराजस्य एवं विधो भवेत् तमुपायं वक्ष्यामि इति षड्मानां समर्थ: ॥५९॥
अथ लेपनक्रामणरंजनविधानमाह ॥ कृत्वालक्तकवस्त्रलिप्तमनुस्नेहमुपरि चूर्णेन ॥ अवचूर्णितं नु कृत्वा गंधकशिलयापात्रे कृ
त्वा यसे चसमे ॥६०॥ टी० ॥ कृत्वालक्तकवस्त्रमित्यादि प्रथमं अलक्तकं आलक्तकेन रंजितं यद्वस्त्रं तदालक्तकं कृत्वा अनुपश्चात् स्नेहं कंगुण्या
दीनां तैलं लिप्तं कार्यं तत्तैललिप्तवस्त्रोपरि चूर्णेन वक्ष्यमाणोपधानां अवचूर्णनं कुर्यात् ॥ तैललिप्तवस्त्रं गंधकशिलया अवचू
र्णं अवचूर्णितं कृत्वा तदुपरि दातव्यं ॥ दर्शयति ॥६०॥ पुनस्तदुपरि गंधकशिलाचूर्णोपरि मृतदत्वा पुनर्गंधकशिलाचूर्णं सूतवरे
सूतराजोपरि दत्वा पश्चात् लाक्षारणानंतरं वह्निं कार्यो भावर्भिरायसे पात्रे लोहमये समे समभूमौ धते पात्रे तत्रोपरि कार्यो च ॥६१॥
विध्यंतरं दर्शयति ॥ दीपं प्रतिबोध्य ततस्तैलं दग्ध्वा ततस्तां कुपात्रं कामस्यां स्वांगशीतं तत: कार्यं ॥६२॥ टी० ॥ ततो वह्नि: पात्रोपरि
करणानंतरं दीपं प्रतिबोध्य प्रज्वाल्य सूतस्य ततो वारं स्तोकमल्पं तैलं दद्यात् ॥ यावद्यामप्रहरस्यार्द्धं स्यात् तावत्सा कुर्यादिति शेष:
॥ ततोनंतरं तत्सतितं तैलं स्वांगशीतं कार्यं ॥ अंगे तलद्रवरूपे शरीरे यथा स्वस्वयमेव शीतं यथा स्यात् तथा कार्यं ॥६३॥ तच्चाह ॥ गृह्णी
यादथ सूतं कृष्णिलिप्त्वा ततस्तेन ॥ क्रामणयोगे लिप्ता पुटितं साहिष्णि निर्धाता: ॥६४॥ टी० ॥ शीतकरणानंतरं सूतं कृष्णीं च
गृह्णीयात् । कमविदेतिशेष: ॥ ततोनंतरं सासूतं कृष्णीं तेन पत्रेण लिप्त्वा सीतक्रामणयोगे लिप्त्वा च हेम्नि सुवर्णे निर्धाता कार्येति ॥६४ २३

58
1936

विध्यंतरमाह ॥ अथ वादरदइत्यादि दरदशिलालगंधा: प्रतीता: माक्षीकपक्वमृतनागै: कुंकुष्टप्रवालसहितै: पिष्टै: कंगुणीतैलै:
॥६५॥ टी० ॥ अथ वादरदइत्यादि दरदशिलालै: गंधकमाक्षीकं यत्सह्यं भिंदूरीकृतं मृतनागैश्च तैर्पुन: कुंकुष्टप्रवाल सहितै: कुं
कुष्टं विरंगं प्रवालं विद्रुमं ताभ्यां सहितै: पुनरेतै: कंगुणीतैलं ज्योतिष्मतीस्नेहपिष्टैश्चूर्णीकृतै: मध्यसूतकयुक्त: कार्य: इत्य
ग्निमश्लोकसंबंध: ॥६५॥ तच्चाह ॥ मध्यसूतकयुक्तामृदित: खल्वेतथायसविधिना ॥ संस्वेद्य वंशनलिकादोलायंत्रेण स्वे
दयेत् त्रिदिनं ॥६६॥ पूर्वोक्तौषधै: कृत्वा मध्ये औषधोत: सूत: युक्त: कार्य: पुन: मर्दयित्वा वंशनालिकायां दोलायंत्रेण स्वे
दयेत् त्रिदिनं दोलायंत्रेण स्वेदितं कुर्यादित्यर्थ: ॥६६॥ तच्चाह ॥ लिप्त्वा कृष्णै: पत्रं पूर्वोक्तविधिना तस्मै नागं दत्वा प्रकटं स्तोकं स्तोकं
क्रमेणैव ॥६७॥ एतानि स्वेदितौषधसंयुक्तानि नि: कृष्णै: कृष्णवर्णं पूर्वोक्तविधानेन सूतकृष्णीं विधानेन पत्रं लिप्त्वा पुना: प्रकटं यथा
स्यात् तथा स्तोकं अल्पमल्पं क्रमेण भागं दत्वा ॥ कनकं जायते इत्यग्निमश्लोकसंबंध: ॥६७॥ भवति हि कनकं दिव्यं अक्षीणं देवयोग्यं
च एकं जारितसूतेन सकला: खलु हृद्धिका: सर्वा: ॥६८॥ एवं कृतसति अक्षीणं अक्षयं दिव्यं प्रवरं देवयोग्यं देवा: इंद्रादय: तद्योग्यं
भ कनकं भवति युक्तायमर्थ: ॥६८॥ ॥ विशेषमाह ॥ निर्बीजसमजीर्णं पादं कनकं वषोऽशांशेन अर्धेन पादयोगतनूपादेन कनक
तुल्यगं कनकं च ॥६९॥ टी० ॥ निर्बीजमिति निर्बीजं यथा स्यात् तथा समजीर्णं पादं तु यांशेन फलं ददाति बीजं यथा अर्द्धेन षोडशां
शेन फलं ददाति च पुन: तदर्द्धेन जीर्णेन सादयोगं तत्सादेन एकेन तत्सादयोगं फलं ददाति इति सर्वत्र वाच्यं तुल्यं कनकं च जीर्णं पूर्णं फलं
ददाति इति ॥७०॥ हेमाकृष्टिनंतरं ताराकृष्टिमाह ॥ अहं कृष्टि: कृष्टयामि मृतवंगं मारितवंगेन ताम्रं कनकहरितालेनेति अथ ताम्रं
तुल्यांशं लवितं विस्तीर्णं यथा तथा निर्धातं विधिना स्फुटं निर्मलं निस्तरं गंतु ॥७१॥ टी० ॥ पश्चाद्वंगताम्रयोगानंतरं प्रकटानामूषास
यावन्निर्मलं मलवर्जितं स्यात् तावन्नागं देयं पुन: यावन्निर्मलं उज्ज्वलं निस्तरं गंतुं नागोऽपि वर्जितं स्यात् तावद्विधिना ध्मानं कुर्यादित्य
र्थ: ॥ विशेषमाह ॥ ताम्रशिलासर्जिकयासैंधवलवणेन नयनीहतसहितै: ॥ एकैकं सहितं वा वधं दत्वा पुन: शुल्बे ॥७२॥ टी० ॥ ता
म्रं इत्यादि ताम्रं हरितालं शिलामनोह्वा सर्जिता प्रतीता तया सैंधवं चलवणं चतुर्तेन नयनीहतसहितै: एतै: कृत्वा एकैकं पृथक् एकेन वा स
हितमेकत्वेन पुन: शुल्बे ताम्रे वधं दद्यादिति ॥७२॥ तारवेधनिषेकान्याह ॥ एकगणं माहिषघृतं स्नुहिक्षीरं सर्पिषो: क्रमश: ॥ सगुडं

दुग्धविमिश्रैः क्रमशोवधनिषेकश्च ॥७३॥ टी० ॥ छगणमित्यादिशगणंवनोत्पलंमाहिषंतक्रंमाहिष्याइदंमाहिष्यंरसुहिक्षी
रेणमेहुंडुग्धेन सहपुनः सर्पिषा घृतेन सहगुडदुग्धमिश्रितं कृत्वा क्रमशः क्रमशश्च वेधवधकर्मणि निषेकः कार्यः ॥७३॥
तारारूष्टिमाह ॥ कांची ब्राह्मी कुटिलतालकसमभागयामितं धातं ॥ शुल्बंविशुद्धमनेन तुसारा रूष्टिर्भवेद्दिव्या ॥७४॥ टी० ॥ कां
चीत्यादिकांचीस्वर्णमाक्षिकाब्रह्मीमनोहाकुटिलंवंगं तालकं प्रतीतं एतत्समयोजितं समांशमिलितं सत् धातं कुर्यात् ॥ पु
स्त्रेण काच्यादिगणनविधं शुल्बंदिव्यामनोरमा तारारूष्टिर्भवेत् ॥७४॥ तारारूष्टिर्विधानमाह ॥ एवंतारारूष्टिलिप्तांबिक्र
रसेन सरितेन ॥ तारंकुरोतिविमलंलेपंवापादजीर्णादि ॥७५॥ टी० ॥ एवंक्रूविधानेन सारितेन सारणाकर्मकृतेन लिप्तांबिक्रा
सितारारूष्टिर्भवेत् ॥ पुनरियंतारारूष्टिः तारंविमलं मलवर्जितंकुरोति पादजीर्णादिपादेन जीर्णं यस्मिन् आदिशब्दात् अर्द्धसम
ग्रहणं कार्यं ततलेपमिति ॥७६॥ विशेषमाह ॥

॥७६॥ टी० ॥ रीतिपूर्वोक्तविधानेनमिलितंविधंक्रमितंमालूकातुल्यं समांशं सत् तारदलंरूप्यपत्रंभवति ॥ तद्रूप्य
दलंछेदनताडननिकर्षैः छेदनखंडनं ताडनं घनघातः निकर्षः शिलापरिपरीक्षणं तैरिति तापैश्चनिर्दोषंभवति ॥७६॥ एवंवेधविधा
नशास्त्रविधिज्ञेन कर्मकुशलेन ॥ ज्ञात्वागुरूपदेशं कर्तव्यंकर्मनिपुणेन ॥७७॥ एवंविधं अमुनाप्रकारेणशास्त्रविधिज्ञेनशास्त्रस्यवि
धिं जानातीति सः तेनकर्मनिपुणेन संस्कारप्रवीणेनकुशलेन कर्मकर्त्रा गुरूपदेशं गुरुरुक्तलक्षणोयथादीतस्य उपदेशं ज्ञात्वा वेधविधा
नं कुर्यादित्यर्थः ॥७७॥ इतीश्रीरसहृदयवधावबोधोऽष्टादशः ॥ ॥श्रीः॥ भक्षणविधानमाह ॥ इतिरसराजस्यविधौवेध
विधानंप्रसंगतः प्रोक्तं अधुनाप्रक्रांतानपिवक्ष्यामिरसायनेयोगान् ॥९९॥ कायशोधनमाह ॥ आदौप्रातः प्रातः सैंधवयुक्तंघृतंपि
बेत् त्रिदिनं तदनुक्वाथैस्त्रिदिनं युंजीयात्कृतक्षानस्नं ॥२॥ विध्यंतरमाह ॥ विधिनास्वेद्यशरीरं कर्तव्यंवार्त्तिकेंद्रेण ॥ क्वथितंकटु
रोहिण्याः संशोधनमनुप्रयुंजीत ॥३॥ विध्यंतरमाह ॥ तदनु च शुद्धाद्ध्वं श्लेष्मांतेरुचितं सकलं ॥ यावत्पथ्यंत्रिदिनं घृतसहितं
तत्प्रयुंजीत ॥४॥ विध्यंतरमाह ॥ पुनरपिचपानयोगं वक्ष्यामिचसकलभुवनहितकृतये ॥ पीत्वाप्रथमेयामे चोष्णोदकसमभिदचूर्णं ॥५५ २४

शोधनायचूर्णमाह ॥ पुनरपिचपानयोगं पथ्यासैंधवधात्रीमरिचवचागुडविडंगरजनीनां ॥ शूंठीपिपल्योरपिचूर्णं त्रिदि
नंप्रयुंजीत ॥६॥ अमुनाशुद्धशरीरः परिहृतसंसर्गदोषबली ॥ पीत्वापयसासहितं यावत्कमसुनाभवेत्शुद्धः ॥७॥ संशो
धनस्यांकणे दोषमाह ॥ अकृतक्षेत्रीकरणेरसायनंयोनरः प्रयुंजीत ॥ तस्यक्रामतिनरसः सर्वांगदोषकृद्भवति ॥८॥ रसा
यनाधिकारत्वमाह ॥ इतिशुद्धोजातबलः शाल्योदनयावकाद्यमुद्गरसैः ॥ क्षेत्रीकृतनिर्देहः कुर्वीतरसायनविधिवत् ॥९५
विध्यंतरमाह ॥ स्फुरतरुतैलघृतंमधुधात्रीरसपथ्यासैंधवैर्मथ्यः ॥ पीत्वाविशुद्धकोष्ठोभवति हिपुमानतीवशुद्धः ॥९७॥ तए
दोषधभक्षणात् ॥ मासक्रमणफलमाह ॥ मासेनकांतिर्मेधाद्याभ्यां प्रशमतिदोषनिकरश्च ॥ मासत्रितयेन पुनः स्यादमरवपुर्म
हातेजाः ॥९९॥ योगांतरमाह ॥ स्फुरदारुतैलमाज्यंत्रिफलारससंयुतंचसमभागं ॥ पीतंतत्सप्ताहान्नथविकारंग्रामनयति ॥
॥९२॥ स्फुरतरुतैलसघृतंपीत्वाशाल्योदनंचसक्षीरं ॥ जीर्णाहारभुक्ताहरति सकुष्ठांश्चपीनसादींश्च ॥९३॥ योगांतरमाह ॥ घृत
सहितः पीतकृतः तैलयुतोवातसंभवान् रोगान् गुडसहितोमधुनावाकफजान् हंसमरदारुरसः ॥९४॥ रसायनेभाव्याभोज्यप
थ्यानाह ॥ वर्जितकांजिकशाकं पयसाशाल्योदनंचभुंजीत ॥ द्विचतुः द्विः षट् पलमानंमात्राधमंमध्यमाज्येष्ठाः ॥९५॥ अथरसयोग र
माह ॥ तदनुचपातनशुद्धसूतकमारोटमेवाश्नीयात् ॥ स्वेदनमूर्छोत्थापनपातनरोधाश्चनियमाश्च ॥९६॥ प्रसंगतः पतनमा
ह ॥ अभ्रकसहितः पात्योविधिनायावरिठरोभवति ॥ अथवामाक्षिकसहितः पात्यः सूतोविधानेन ॥९७॥ रसायनसूतस्य आरोटादि
प्रयोगमाह ॥ इत्यारोटः सूतोक्षेत्रीकरणे नियुज्यते प्रथमं ॥ अथवाभस्मचकृत्वा वरोवाकल्कयोगेन ॥९८॥ रसयोगमाह ॥ माक्षिक
शिलाजतुलोहचूर्णपश्चात् विडंगघृतमधुभिः ॥ संयुक्तंरसमादौक्षेत्रीकरणायप्रयुंजीत ॥९९॥ इतिकृत्क्षेत्रीकृतसूतघनकांतमधु
घृतादिसंयुक्तं शुक्लामरतांयछेत्क्षेत्रीकरणंप्रधानमिदं ॥२०॥ इत्योराः क्रिया ॥ २०५ अथपत्राभ्रक्रिया ॥ अथकृष्णवापीतं वास
योज्यघनेशिखिप्रभंबहुशः ॥ स्फुरभिक्षीरनिषिक्तं गतगिरिदोषं रसायनेयोज्यं ॥२१॥ अभ्रकयोगमाह ॥ निश्चंद्रिकमपिशुद्धं विडंगभि
फलाज्यमधुसमायुक्तं प्रतिदिवसंपलमेकं भुक्त्वाक्षीराशनोविधिना ॥२२॥ तद्भाह ॥ त्रिकटुकविडंगत्रिफला माक्षिकशिलाजतुयुतं
वाम ॥ क्षीरोदनमश्नीयाज्जीवतिजंतुः शतंवर्षं ॥२३॥ अभ्रकस्योत्तराकारंदर्शयन्नाह ॥ इत्येवमादयोन्येकांजिकयुक्ताश्चकीर्तिता

बहुशः पत्राभ्रकप्रयोगाः वर्ज्यानियुक्तिकालेहि ॥२४॥ अविधिनापत्राभ्रकयोगविकारायसन आह ॥ येपत्राभ्रकयोगारसा
यमार्थकीर्तितविधिना ॥ अज्ञातद्रव्यगुणैस्तैरुपदिष्टो जरामृत्युः ॥ २५॥ जरामृत्युरुपदेशहेतुमाह ॥ अप्राप्तलोकभावं घनोभ्यजल
राग्निमुपशमंनयाति ॥ अग्निर्विनापिनश्यति परिभूतोविविधरोगगणैः ॥ २६॥ अभ्रे अभ्रसत्वं तदाह ॥ अभ्रसत्वं घनपटले
स्थितमपितथाचकुरुतेनिजंकार्यं यथावन्हिः काष्ठस्थितः सन्पयसिघृतस्वकार्यंनकुरुते ॥ २७॥ भक्ष्याभक्ष्यमन्नमाह ॥ अभ्रस्य
रसायनिनां भक्ष्यमिदंकीर्तितंपरंशस्तं त्रिविधंगगनभमभक्ष्यं काचकिट्टंचेपचरजः ॥ २८॥ अधुनाघनसत्वलोहसाधनमाह ॥ आ
दौघनलोहरजः त्रिफलारसभावनेश्वनिर्पृष्टं ॥ कुर्वंतघनसदृशं स्थगितंवस्त्रेणसूर्यकरैः ॥ २९॥ उत्थश्लक्ष्णंकृत्वा विधायकांत
लोहचूर्णसमं लोहघनंचतदेवं भृंगेणचभावयेद्बहुशः ॥ ३०॥ तच्चाह ॥ त्रिफलाघृतमधुभिश्रितमभ्रतमिदं मासमस्तितं धान्येशस्त्र
कटोरिकसंपुटमध्यगतं पूजितामंत्रैः ॥ ३१॥ तच्चाह ॥ त्रिफलाघृतमधुभिश्रितं मासेनतुततोथत्यज्ञात्वा बलंतत्प्रयुंजीत ॥ कांतिर
नाथगगनं गगनंविनातथाचकांतंचा ॥ ३२॥ फलमाह ॥ स्थौल्यपटच्छंकांचं तिमिरार्बुदकर्णनादशूलानि ॥ हंत्यक्षोसिभगंदरमे
हप्लीहापिपालित्यं ॥ ३३॥ पथ्यमाह ॥ एतत्कुर्वीतमतिमान् गोरसमस्तु प्रधानमश्नीयात् ॥ जांगलमुद्गाज्यपथ्यः शाल्यादनंब्रह्मच
र्येण ॥ ३४॥ अथजीर्णरसस्याधिक्यंदर्शयन्नाह ॥ घनसत्वंपादजीर्णः कांतजीर्णोथतीक्ष्णसमजीर्णः ॥ क्षेत्रीकरणोपरमः प्रयुज्यतेपि
पुनरस्योत्थः ॥ ३५॥ घनसत्वं कांतसूतं मृतहेमशतावरीरसोपेतं ॥ घृतमधुलिहंवर्षातानहंतिमृत्युंजरांचैव ॥ ३६॥ विशेषमाह ॥ एषा
मध्येकं योगंक्षेत्रीकरणार्थमादितः कृत्वा संवत्सरयेनवानिश्रेयसीसिद्धयेयोज्यं ॥ ३७॥ बहुनिदर्शनेशेषमाह ॥ अभ्रकसस्यकमाक्षिकसर
कदरदविमलवज्रगिरिजतुभिः ॥ वैक्रांततीक्ष्णहाटकतारारत्नैश्च ॥ ३८॥ संयुक्तैर्व्यसेर्वांद्विचतुर्भिः यथालाभं जीर्णाहंतिरसेंद्रो
रसायनेशस्यतेसिद्धिः ॥ ३९॥ कुत्सितविधानं दर्शयन्नाह ॥ विषनागवंगबधामुक्ताहिरसः करोति कुष्ठादीन् ॥ उपरसबहुतुरसे स्फुटति
भुक्तेतथागनि ॥ ४०॥ जीर्णरसस्यमात्रामाह ॥ घनसत्वकांतकांचीभास्करतीक्ष्णेश्च ॥ चीर्णंजीर्णस्यसूतस्यगुंजमात्रामाषकमेकं परामात्रा ॥ ४१॥
अथवेधविशेषपरिमाणज्ञानंशतवेधिनो द्विगुंजातथासहस्रवेधतोगुंजा ॥ अर्द्धांचलक्षवेधिनि सिद्धार्थकोटिवेधिनः सूतात् ॥ ४२

हेमनियोजितसूतं कांतमणिविद्रुमौषधिकाश्च जपहोमदेवतार्चननिरतः पुमान् इतिसंधारयेत् ॥ अथपथ्यानाह ॥ शालेस्तुषि
ष्टिकोद्भवभोजनभाजं चमुद्गमांससः ॥ यवगोधूमानि चगोक्षीरं मस्तुचविशेषात् ॥ ४४॥ पानेजलमक्षारं मधुराणियानि
यानिकानिशस्तानि पेयं चचतुर्जातकर्पूरामोदमुदितमुखं ॥ ४५॥ अथपथ्यानाह ॥ मद्यारनालात्पानं तैलं दधिवारसेनषं
कटुतैलेनाभ्यंगं वपुषिनकुर्याद्रसायनेमतिमान् ॥ ४६॥ दग्धामपक्वमधुरमुष्णं क्षीरंननष्टमांसतु ॥ पर्युषितफलमूलं भक्ष्यंन
वात्रनिर्दिष्टं ॥ ४७॥ अथलंघनंनकार्यं यामाधोभोजनंनेव ॥ उत्थपनीयानिषिधंरसराजेधीमताकार्यं ॥ ४८॥ तच्चाह ॥ वर्जित
चिंताक्रोधः कुर्याच्चस्मरवाबुनास्नानं ॥ नाच्चाटयेद्ग्रहज्वरराक्षसभूतानि मातृदेवीश्च ॥ ४९॥ चिंताक्रोधनिरोधेहेतुमाह ॥ परमब्र
ह्मणिलीनः प्रशांतचित्तः समत्वमाप [illegible] न्नाश्वासयन्नविरतं विजित्यरसानंदपरितप्तः ॥ ५०॥ विधीतियतत्वंदर्शयन्नाह ॥
यस्यत्वाशास्त्रविधिप्रवर्त्ततेस्वेष्टयारसमूढः तस्यविरुद्धाचारादजीर्णमुत्पद्यतेनितरां ॥ ५१॥ रसाजीर्णलक्षणमाह ॥ संभव
तियदाजीर्णे निद्रालस्यंज्वरस्तमोदाहं नाभितलशूलमल्पजउत्तारुचिरंगभंगश्च ॥ ५२॥ अजीर्णेप्यपायमाह ॥ ज्ञात्वेवमजीर्ण
मस्य प्रशादनाययोगोयं कार्यो दिवसत्रितयं संत्यज्यसारयनेरुधिया ॥ ५३॥ तच्चाह ॥ कर्कोटीमूलरसं कषायमथसिंधुनापिवेत्त्रि
दिनं सोवर्चलसहितं वागोजलसहितंरसंजीर्णे ॥ ५४॥ अन्यच्चाह ॥ पिष्ट्वाथमातुलिंगी पिबतिरसंशुंठीसैंधवंप्रातः ॥ कथितंगो
सलिलेनरक्ष्यतिसम्यग्रसाजीर्णं ॥ ५५॥ नागादिकदरसभुक्तोपाहयमां ॥ कथमपियच्चज्ञानात् नागादिकलंकितारसोभुक्तः तन्वो
दयतिचपिबेत गोजारकटुकारवल्लीशिफाः ॥ ५६॥ तच्चाह ॥ उत्तरपुंखासुरदालीपटोलबिंबश्वकोचमाचीच ॥ एकतमाचीनिहिमा म्ह
ताजीर्णेहिसेविता ॥ ५७॥ तच्चाह ॥ लवणाम्लकटुकैः रससंश्रावोजरोभवति ॥ अतिमधुरैश्चविनश्यति जाठरवन्हिः सततभुक्तै
श्च ॥ ५८॥ तद्विशेषमाह ॥ यः पुनरेवंसततं करोतिमूढः समाहारंतस्य विनश्यत्यग्निः कामतिरसोभवेद्व्याधिः ॥ ५९॥ यस्मान्महामहत्तिमह
त्वात् रसात्सहस्रलक्षकोटिवेधीशः ॥ अनयाक्रियया सिध्यति यत्नाद्रसक्रियायोगात् ॥ ६०॥ अथयथोत्तरविधानेन ॥ लक्षणमाह ॥ शतस
हस्रलक्षवेधीकोटिथारबुदनिर्बुदवापि ॥ पिष्टोभुंजीतरसोबलिसहितंसिद्धिदोभवति ॥ ६१॥ तद्विशेषमाह ॥ आदौसूतंविधिना क्षेत्रीकरणानं
तरंविधानेन ॥ अत्यवेधकरसमुद्यतपश्चात्क्रमेणबहुमरवेधीप्रयुंजीत ॥ ६२॥ पूर्वविधानंप्रदर्शयन्नाह ॥ कामतितथाहिसूतोजनयतिपुत्रांश्च

दिवगर्भाभाव ॥ स्त्रीषु चनिश्चलकामो भवति वलिपलितनिर्मुक्तः ॥ ६३ ॥ पुनः किंस्यादित्याह ॥ बुद्धिर्बलं प्रभावः महायुषा वर्द्धतेरसा
यनिनः प्राप्तस्यदिव्यबुद्धिर्द्धिया श्चगुणाः प्रवर्द्धते ॥ ६४ ॥ पुनः किंस्यादित्याह ॥ बुद्धिर्बलं प्रभाव ॥ तच्चाह ॥ एवंरसमंसंधाः दुःख
जरामरणवर्जितोगुणवान् ॥ खगमनेनचनित्यंरसंचतत्सकलभवनेषु ॥ ६५ ॥ दत्ता भुवनत्रितये चाष्टासोपादपद्मयोनिरिव ॥
॥ ६६ ॥ इतिस्तोणंरसक्रिया ॥ इदानीगुटिकावक्ष्ये ॥ युग्मं ॥ अमरसुंदरीगुटिकाविधानंगुणाश्चाह ॥
कांताभ्रसत्वहेमतारंचार्कं शतःसंख्या ॥ बहुसतसमांशंध्मातंगोलकतरवाट ॥ ६७ ॥ बाह्यरसेनलिप्तंवदनगतं वस्त्रवारकरोगान्
हंतिहिशरीरसंस्थान् नाम्नाअमरसुंदरीगुटिका ॥ ६८ ॥ टी० ॥ कांताभ्रइत्यादि ॥ कांतंचुंबकं ॥ अभ्रकसत्वंप्रतीतं हेमकनकंतारंचतदेक
वङ्गावोद्वौ ॥ कांतंचुंबकं अभ्रकं शुद्धअभ्रकसारहेमकनकं तारंसूर्यं इतिचपुनरर्कः ताम्रं एषां कांतादीनांसंख्यागणनासमांशतःसम
भागतोज्ञेयापुनः सूतसमांशंपारदेनतुल्यभागं ध्मातंकुर्यादेधमूषायामितिशेषः ॥ किंकृतं सतबाह्यं बहुगोलोपरसेनमारणायमुक्त
द्रवेण लिप्तंसतध्मातंकुर्यात् ॥ इत्थंकृतरवाटपिष्टिरूपगोलाकारंवदनगतंमुखांतस्थितं शस्त्रवारकंस्यात् अस्मिंश्चवदनगतेसति
शरीरस्थदुःखदानाप्रदारोनलगतिवपुरियंनाम्ना अभिधानेन अमरसुंदरीगुटिकाज्ञेयाः इयंशरीरस्थमुखेवान्यस्थलेवास्थितानास
तिशरीरस्थानरोगान्हंतिविनाशयति अनुक्तमपिमानंपंचनिष्कप्रमाणंज्ञेयमित्यर्थः ॥ ६८ ॥ इति अमरसुंदरीगुटिकाहेम्नावारजतेनवावापि
सहितोध्मातोव्रजत्येकतामक्षीणोनिविडगुरुश्चगुटिकाकरोतिदीर्घः ॥ चूर्णंतत्सद्रवबलयातिविदितंघृष्टोनमुंचन्मलंनिर्गंधोद्रवतिक्षणा
त्सहिमतो बह्वभिधानोरसः ॥ इतिग्रंथांतरे ॥ अथमृतसंजीवनीनाम ॥ ७० ॥ हेमयुक्तागच्छलके मुकुटेवाकंठसूत्रे कर्णेवा ॥ मृत्युभयाक
रोगंविशस्त्रजरासततदुःखसंघातं ॥ ७० यस्यांगेनिहितयंगुटिकामृतसंजीवनीनाम मासुरकिन्नरयक्षपूज्यतमसिद्धयोगेंद्रैः ॥ ७१
प्रक्षाल्यतोयमध्येगुटिकाघटिकाद्वयंततः क्षिप्त्वातच्चैवंवदनगतामृतकस्यास्थानंकुरुते ॥ तोयंतदेवपिबतिस्वरुंपथ्यान्वितः
सतः पुरुषः लभतेदिव्यंसवपुर्मृत्युजरावर्जितः सुदृढं ॥ ७२ ॥ टी० ॥ यः पूर्वोक्तोसूतः लक्षाद्ध्वंकोटयर्बुदलोहानरूप्यादीनुवेधते
अस्मिन्बद्धे सूतेमुखस्थेप्रकाशमुखेयंत्रस्थापितेसारणयोगैः सारणतेलादिभिः रत्नवज्रादिकं जारयेत्पुनः समांशेनागैः तुल्यांशसी

87
1936

सकैः सूतोयुक्तः कार्यः सरलोहायस्कांततात्प्यसत्वैश्चयुक्तः कार्यः सरलोहायस्कांततात्प्यसत्वैश्चयुक्तः कार्यः सरलोहंक
नकंचयंस्कांततात्प्यसत्वं माक्षिकसारंएतैश्च अभ्रकसत्वसमतासतीमृतसंजीवनीनामगुटिकाभवति ॥ पुनस्तत्रमूषायां
इयंहेमयुनाकार्यां ॥ पुनरियंगुटिकायस्यगुलछकेनिहिताभवतिवामुकुटकिरीटेवाकंठसूत्रे कर्णेकंठसूत्रेकंचकंठसूत्रकर्णे
तस्मिन्वाअंगेकहस्तपादादौतस्यमृत्युभयशोकरागशस्त्रजरासततदुःखसंघातनश्यति ॥ इतिअध्याहारः ॥ एतेपुस्थानेषु
यस्येयंनिहितास्थापिताभवतिसअमरयक्षकिन्नरपूज्यतमः सिद्धयोगेंद्रैः पूज्यतमः सिद्धाः देवविशेषाः योगेंद्राः नागाजक्षा
दयः इयंगुटिकाकिंनामततोनंतरंमृतसंजीवनीजलमध्येक्षिप्त्वाप्रक्षाल्यघटिकाद्वयंवदनगतोसतोमृतकस्यपुरुषस्योत्थापन
मप्रबोधनंकुरुतेयः पुमान्पुरुषः तदेवजलंतोयंगुटिकाक्षालनंस्वरुंनिर्मलंनिर्मलंपिबतिकिंविशिष्टः पथ्यान्वितोहितावहद्र
व्यभक्षणयुक्तः सपुरुषोदिव्यंवपुः देवशरीरंभवतिकिंविशिष्टंदिव्यंपुनः जरावजरावर्जितंव्याधिपालित्यरहितापुनः सुदृढं
ज्ञेयंगुटिकापरिमाणंपाकविधानंपूर्ववदित्यर्थः ॥ ७२ ॥ इतिमृतसंजीवनीगुटिका ॥ अथवज्रिणीगुटिकाविधानंचगुणानाह
॥ युग्मं ॥ कांतंघनसत्वंकमलंहेमतारंचयथाक्रमंदृढं ॥ समभागेनबीजवरंवज्रयुतंवज्रिणीगुटिका ॥ ७४ ॥ एषामुखकुहरगताकु
रुतेनवनागतुल्यबलं ॥ तद्वपुरपिदुःभेद्यंमृत्युजरारोगनिर्मुक्तं ॥ ७५ ॥ टी० ॥ कांतइत्यादि कांतंचाभ्रकंचअनयोः सत्वं कांतघन
सत्वं घनसत्वंकमलंचेति कांतसत्वंचुंबकसत्वघनसत्वं अभ्रकसारं कमलताम्रंचपुनर्हेमस्वर्णं तारंचरूप्यं एतेपूर्ववत् यथाक्रमेणवि
धानेनरुतंदृढरुतंचतत्तद्दृढंचेतिबीजवरंसमभागेनं कार्यंकिंविशिष्टं बीजवज्रयुतंहीरकमिश्रितंचइयंगुटिकानामतोवज्रिणी
पुनरेषावज्रिणीगुटिकामुखकुहरगतासतिमुखांतःप्रविष्टासतिनवनागतुल्यबलंनवसंख्याकाः नागाःहस्तिनः तुल्यंतत्समर्थबल
तद्रुतेनतद्वपुः तस्यगुटिकामुखधारिणोवपुः शरीरदुर्भेद्यंदुःखेनभेत्तुमशक्यंपुनः मृत्युजराव्याधिभिः निर्मुक्तमित्यर्थः ॥ ७५ ॥ इ
तिवज्रिणीगुटिका ॥ ॥ अथरवेचगुटिकाविधानंचगुणानाह ॥ धूमावलोकितरसपंचमहारत्नजारितेसति ॥ बीजेनगगनसत्वं
माक्षिककांतप्रयुक्तेन ॥ ७६ ॥ रवेचरसंज्ञागुटिकाप्रतितिमुखेक्षिप्तमाणत्रे देवासुमरसिद्धगणैः पूज्यतमोभवतिचेद्राद्यैः ॥ ७७ ॥ टी० ॥
धूमावलोकितेधूमवेधिनिरसेसूतपंचमहारत्नजारितपंचसंख्याकैः महारत्नैः वज्रादिभिः ॥ तथाचवज्रश्चमौक्तिकश्चैवमाणिक्यनी

नीलमेवच ॥ मरकतंचविज्ञेयामहारत्नानिपंचधा ॥ पुनर्माक्षिकक्रांतप्रयुक्तेनताप्यचुंबकीमिलितेनबीजेनगगनसत्वंसारि
तेनरसेसतिखेचरसंज्ञागुटिकाभवतितस्मिन्गुटिकारूपेरसक्षिप्तमात्रेणमुखेपतितमति इंद्राद्यैः देवासुरसिद्धगणै
श्चपूज्यतमोभवति ॥ इंद्रोमघवाआद्यायेषांतेतैः देवाः अमराः असुराः दैत्याः सिद्धाः देवविशेषाः तेषांयेगणाः समूहाः तैः
कृत्वाअतिशयेनपूज्यतमोभवतीत्यर्थः ॥ ७७ ॥ इतिखेचरीसंज्ञागुटिका ॥ ७९ ॥ अथसंवादस्तानंतत्वंसूचयन्नाह ॥ रसवादा
नंतगुणोद्रवगोलकुकुल्कभेदन ॥ कलितः प्रधानसिद्धैः यदृष्टास्तेयजंतिनराः ॥ ७८ टी० ॥ रसवादः अनंतगुणः अनंताः गुणाः
यस्यसतथोक्तः अनंताअपरिमिताः केनकत्वारसवादाअनंताः द्रवगोलककुल्कानांप्रत्येकमनंतत्वात्तेद्रवाद्यवादिअनंतः
किंभूतः प्रधानसिद्धैनित्यनाथादिभिः कलितः रचितः येमहासिद्धैः सिद्धैः रसवाददृष्टास्तेनराजयंतिसर्वोत्कर्षेणवर्तंते ॥ ७८ ॥
अथग्रंथकारस्यितुर्वंशवर्णनमाह ॥ शीताशुवंशसंभवहृदयकुलजन्मजीनतगुणमहिमा ॥ सजयतीश्रीमदनश्चकिरातनाथो
रसाचार्यः ॥ ७९ ॥ अथचास्यकारयितुर्गुणवर्णनमाह ॥ यस्यस्वयंभवतीर्णारसविद्याभक्तमंगलाधारापरमश्रेयसः हेतुः श्रेय
सिपरमेष्ठिनः पूर्वे ॥ ८० ॥ कर्तास्वनामसदृत्वंसूचयंनाह ॥ तस्मात्किरातनृपतेबहुमानभवाप्यरसकर्मरतः रसहृदयाख्यंतंत्रंविरचि
तवानभिक्षुः गोविंदः ॥ ८१ ॥ इतिश्रीमत्कुलवंशपयोधिसुधाकरमिश्रमहेशान्मंजचतुर्भुजविरचितायांरसटीकायांरसहृद
यटीकायांरसप्रकाशात्मकोएकोनविंशोक्वोधः ॥ श्रीः ॥ ॥ श्रीगजाननप्रीतयेभूत् ॥ ॥

॥ ८९ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥

571
1936

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिरस हृदयं समाप्तं